ओमिति करेण विश्वं निषेधविधिदंष्ट्रयोस्समारोप्य ।
नियमयति यस्समस्तं नमोस्तु विघ्नेश्वराय तस्मै प्राक् ॥
याभ्यां प्रकाशितं वर्त्म सिद्धांते सिद्धभाविनः (!) ।
गुरूणां पितरावाद्यौ सद्योज्योतिर्बृहस्पती ॥
प्रोत्तुंगमत्तमातंगस्कंधपृष्ठप्रकाशितं ।
सर्वेश्वरं तनो वंदे श्रेयोलांछनमव्ययं ॥
कैश्चिद्दृष्टेनुनीतः कुळद्रिशि (?) तु परैः न्यायदृष्ट्या यथान्यै-
स्त्यक्त्वा सिद्धांतसिद्धं गुरुवरगदितं वर्त्म नीतः कुमार्गे ।
मातंगो यं[द्वि]तीतः[1] कुमतिविहतये येन वृत्त्यंकुशेन
क्षेप्तुं मार्गे प्रवृत्तास्तदिह ननु वयं ग्रंथविद्भिः परीक्ष्याः ॥
त्यक्त्वा पदान्यत्र तथा पदार्थं
सूत्रान्वयं स्वागमवर्त्मनं (!) च ।
व्याख्यातृलोको हि गतः कुतर्कैः
वृत्तिः प्रवृत्तेयमतः पदादौ ॥
पाठभेदोत्र साधुर्वा तदन्यो वाथ मूलतः ।
किं त्वर्थोत्र [2]भ्रमात्तेन तत्प्रदर्शनमज्ञता ॥
अथैकः पुस्तकेभ्योसौ पाठो ग्राह्यो विचार्य्यते ।
साधुरेव तु स(त्कार्य)द्ग्राह्यस्साधूनामपि भावतः ॥
ततश्च पाठभेदेभ्यः प्रोद्धृतैस्साधुभिः पदैः ।
तदभावाद्युक्तमन्यैस्तंत्रमेतत्प्रकाश्यते ॥

At the end of one of the *prakaraṇas*:— इति नारायणकंठात्मजभट्टराम-कंठविरचितायां मतंगवृत्तौ त्रिपर्वपदार्थे बुद्धितत्वप्रकरणम्.

No. 957.

Colophon:— इति कामिकोपभेदे मृगेंद्रे योगपादे पटलश्चतुर्दशः। योगपादस्समाप्तः. The *charyâpâda* of this book is not complete.

---

[1] Read यन्निर्तीतः.

[2] Read भ्रमा°.

No. 958.

Colophon :— इति मतंगपारमेश्वरे विद्यापादे अग्निपाद एकविंशतितमः पटल-स्समाप्तः.

No. 959.

Colophon :— इति [1]लक्षणद्वयाध्यापकश्रीमदघोरशिवाचार्य्यविरचितायां श्रीमत्सर्वज्ञानोत्तरवृत्तौ प्रासादमंत्रोद्धारप्रकरणम्.

No. 960.

Colophon :— इति श्रीमन्परमेश्वरापरनामधेयश्रीमदघोरशिवाचार्य्यविरचितायां क्रियाक्रमद्योतिकायां दमनकविधिस्समाप्तः.

No. 961.

Beginning :—

शिवादिशुद्धविद्यांततत्वबिंदुविजृंभकः ।
कलादिग्रंथविक्षोभ . . नंदनियोजकः ॥
यथाधिकारं त्रिः पुंसां भोगमोक्षफलप्रदः ।
लयभोगाधिकारेशः पाशानां मोचकोस्तु नः ॥
श्रीमद्ज्ञानशिवाचार्य्यो गोळकि[म्]मठनायकः ।
तस्य वंशे समुद्भूतः पंचाक्षरगुरू[त्त]मः ॥
सद्दर्शनप्रवीणोयं सर्वलोकैकपूजितः ।
तस्य पुत्रो महान्मृत्युंजयनाथो गुरूत्तमः ॥
लोकानुग्राहकः पूज्यो [ज्या]तीय इव भास्वरः ।

अथ तत्रभवः[2] पंचाक्षरनाथाचार्य्य[:*] कामिकाद्यागमार्थस्य दुरवगाहत्वात् सर्वेषां स्पष्टबोधनाय कामिकादीनालोच्य परमेश्वरादविच्छिन्नसंप्रदायेन स्नपनावलिविंशाख्यं निबंधनं सुप्रभेदाद्यागमप्रकारेण चिकीर्षुरविघ्नसमाप्त्यर्थमिष्टदेवतानमस्कारं *etc.*

No. 967.

Colophon :— इति कुमारतन्त्रे कौशिकप्रश्ने महासंहितायामाचार्य्यलक्षणपटलः पंचाशीतितमः.

---

[1] Other colophons have लक्षद्वयाध्यापक°.   [2] Read °भवान्.

No. 968.

Beginning :—

विश्वेश्वरं प्रणम्यादौ विश्वमूर्त्तिमुमापतिं ।
पौष्करे ज्ञानपादांशं व्याख्यास्येहमुमापतिः ॥

At the end of one of the *paṭalas* :— इति पौष्करव्याख्याने कलंदिनिरूपकः पंचमः पटलः.

No. 972.

Beginning :—

विश्ववंद्यं विघ्नराजं सर्वशुक्लां सरस्वतीं ।
पूर्वाचार्य्यान् सर्वपूज्यान् कुर्वे नतिपदं गुरून् ॥
कृष्णानंदापूर्वचंद्रः क्षयवृद्धिविवर्जितः ।
निष्कळो निष्कळंकश्च जयत्यंतस्तमोपहः ॥
विद्यारण्यं भजे हृद्यं सद्योविद्योत्थतापहं ।

* * *

श्रीरामं गुरुमानम्य संप्रदायानुसारतः ।
तैत्तिरीयोपनिषदस्तन्यते लघुदीपिका ॥

Colophon :— विद्यारण्यकृतव्याख्यादुग्धाब्धि *etc.*[1] इति लघुदीपिकायां ब्रह्मवल्ल्याख्यायां तृतीयोनुवाकः.

No. 974.

Beginning :—

राधामुखाब्जमधुमत्तमधुव्रतश्री-
कृष्णस्य पादयुगळं शिरसा प्रणम्य ।
नञ्वादसंगतशिरोमणिगूढभावं
श्रीमान् गदाधरसुधीर्विशदीकरोति ॥

No. 975.

Beginning :—

कस्तूरीकमनीयास्यः करुणाकलशोदधिः ।
कमलाकमनो रंगी करोतु करुणां मयि ॥

---

1 See the extract from No. 259 in my *First Report*, p. 67.

[1]सफलसप्तर्षिप्रमुखतपसां प्रादुरभव-
न्नृसिंह[स्संश्य*]न्नृतनि घटिकाद्रौ वसति यः ।
महावैयाघ्रैराराध्यैः[2] महितचरणो यश्चिरमसा-
वपायात्पायान्मामम्रृतफलवल्लीसहचरः ॥

वाधूलान्वयवार्धिकौस्तुभमणिः वंदारुचिंतामणिः
वादिव्रातनतमश्छटादिनमणिर्वागीशचूडामणिः ।
श्रीमत्साम्यवरार्य[वर्य*]तनयश्श्रीमान्महार्यात्मजः[3]
श्रीमान् सद्गुणशेवधिर्विजयतां [श्री*]श्रीनिवासो गुरुः ॥

[[4]श्रीवाधूलकुलोत्तंसश्रीनिवासार्यनंदनः ।
तनुते वेंकटाचार्यः तर्कसंग्रहटिप्पणीं ॥
संतु साहसिकाः कामं साभ्यसूयास्सहस्रशः ।
संत्येव सुधियस्तेन सफलोस्मत्समुद्यमः ॥

अन्नंभट्टो नाम कश्चन विपश्चित् *etc.*

No. 977.

Beginning :—

गळद्दानोद्रेकभ्रमदळिकदंबावृतशिरो
धुनानस्संतोषादिव निजगुरोस्तांडवविधेः ।
प्रचंडैर्दोर्दण्डैः प्रबलतरविघ्नोपशमनो
मनोगम्यं भव्यं वितरतु शिशुश्शैलदुहितुः ॥

सांबं शिवं नमस्कृत्य तर्कसंग्रहचंद्रिका ।
गाधेरककुलोत्पन्नमुकुंदेन वितन्यते ॥

No. 978.

At the end of the *chaturdaśalakshaṇî* :— इति मीमांसान्यायपंचास्यश्रीमद्राघवाचार्यशिष्यस्य पर्वतइत्युपनामकरघुनाथस्य कृतौ गदाधरीपंचवादटिप्पण्यां न्यायरत्नाभिधायां चतुर्दशलक्षणी समाप्ता.

---

[1] Read फलं यः सप्तर्षि°, as in Dr. Burnell's *Tanjore Cat.* p. 122*a*. [2] Read महार्याचैरार्यैर्महित°.
[3] Read °तनयश्रीमन्म°. [4] This half verse is taken from another manuscript of the same work.

No. 982.

At the end of the commentary :— . . . इत्याह ।

नमस्तथाविधायास्म(ा)न् गुरवे शिवतेजसे ।
नि[ध]ये योगरत्नानामनंतफलदायिने ॥

प्रतिपादितार्थविश्वासाय प्रयुक्तः शास्त्रान्तरारंभ इवावसानेपि चावश्यकर्तव्यत्वाच्च गुरुर्न साधारणः अपि तु लोके प्रख्यातकीर्तिः अत एव तच्छिष्योहं अवलेपभीरुणा काश्मीरदेशसंभूतश्रीकंठकुडुंबान्वयो[1] नारायणकंठसूनुः श्रीमतंगकारणालोत्तरपराख्य-सूक्ष्म(ा)स्वायंभुवादितन्त्रयाधानसिद्धांतात्[2] याथात्म्यवेत्ता दर्शनांतरं सिद्धांतार्थं संकरं सहनोपिश्च (?) लोकविदितो महेश्वर इवापरलोकगुरुस्तच्छिष्येण श्रीकंठेन मया रत्नत्रय-परीक्षेयं संस्कृतेति प्रकरणार्थोपसंहारः ।

गुरुर्नेत्रगुरुश्श्रीमानाय[ा*]तो गौडदेशतः ।
नेता शिवागमार्थानां . . . .

No. 983.

At the end of the commentary :—

इति रजतसभेशस्संयमी साधकाना-
मृजुलघु[ल*]लितार्थज्ञानसंसिद्धिहेतोः ।
स्वगुरुवरकटाक्षैर्लब्धसिद्धांतवर्म्मा[3]
व्यतनुत विशदार्थं श्रीशिवज्ञानबोधं ॥

इदमुपसंहारप्रकरणं तदेवं श्रीशिवज्ञानबोधव्याख्यानं ज्ञानावरणभाष्यं संपूर्णम्.

No. 993.

Colophon :—

श्लोकानामिति सप्तत्या नीतिसारसमुच्चयम् ।
चंद्रगुप्ताय चाणक्यस्संक्षेपेनोपदिष्टवान्[4] ॥

इति चाणक्यसप्ततिस्समाप्ता.

---

[1] Read °कुटुम्बा°. [2] Read °सिद्धान्तानां याथात्म्य°.
[3] Read °वर्त्मा. [4] Read °पेणोप°.

No. 997.

Beginning :—

आदित्यस्तोत्ररत्नस्य [1]वृत्तिरत्नप्रकाशिनी ।
अस्माभिरेव क्रियतेरातिसंकोचाविस्तरा ॥

Colophon :— इति चतुरधिकशतप्रबंधनिर्वाहकश्रीमद्दीक्षितचरणकृतं आदित्यस्तोत्ररत्नव्याख्यानं संपूर्णम् ॥ ओं । सव्याख्यानं आदित्यस्तोत्ररत्नं संपूर्णम्.

No. 1002.

Beginning :—

सोयं मदीयाशयरंगमध्ये
सायंनटस्ताण्डवमातनोतु ।
पादारविंदाभरणे यदीये
दधाति नीलोपलतां मुरारिः ॥

आनंदलहरीं विद्यामस्माभिरनुसंहितां ।
व्याख्यास्यामो वयं शैवीं व्याससूत्रानुसारिणीं ॥

No. 1004.

Beginning :—

[नत्वा गणे*]श्वरं स्कंदं सांबं सद्गुरुमेव च ।
भूतिरुद्राक्षमाहात्म्यनिष्पत्त्यादि प्रकाश्यते ॥

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्यअभिनवनारायणेंद्रसरस्वतीपूज्यपादशिष्यश्रीमत्परमशिवेंद्रसरस्वतीविरचि[तं*] भूतिरुद्राक्षमहात्म्यं संपूर्णम्.

No. 1009.

Colophon :— इति श्रीमदद्वैतविद्याचार्यसर्वतंत्रस्वतंत्रश्रीरंगराजाध्वरिवरसून्वप्पय्याध्वरिवरकृतौ रामायणतात्पर्यसंग्रहविवृतौ . . . . . . समाप्तम्

No. 1011.

Beginning :—

ज्ञेयः[2] करस्वयमर्धमेव गिरिजा स्तुत्वा पतिन्नामभि-
स्तत्तादात्म्यमखण्डमेव सुलभं भक्तिस्पृशां यद्वशात्[3] ।
तां प्रख्यापितभक्तवत्सलसमाख्यारूपजैत्रध्वजां
वंदध्वं वरदायिनः पशुपतेरव्याजभव्य[ां] दयां ॥

---

[1] Read वृत्ती रत्न°.
[2] Another copy reads क्षेमे for ज्ञेयः.
[3] Read [illegible]

विधाय वेदान् विविधाः कलाश्च
भावज्ञमप्राप्य विषीदतोंतः ।
शंभोः प्रियं कर्तुमिवावतीर्ण[:*]
श्रीमान् जयत्यप्पयदीक्षितेंद्रः ॥

आम्नायबोधितं शंभोर्नाम्नामष्टोत्तरं शतं ।
व्याकर्तुं प्रयते देवस्स्वीकर्तुं दधतामिदं ॥

Colophon :— इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीकंठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबंधनिर्वाहकमहाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्यश्रीमदाच्छादीक्षितपौत्रेण नारायणदीक्षितात्मजेन भूमिदेवीगर्भजन्मना विरचितं शिवनामाष्टोत्तरशतस्तोत्रव्याख्यानं शिवतत्त्वरहस्याख्यं संपूर्णम् ॥

निर्मिता शिवदासेन नीलकंठेन यज्वना ।
शिवतत्त्वरहस्याख्या शिवयोः प्रीतये कृतिः ॥

No. 1013.

Colophon :— इति श्रीमदद्वैतविद्याचार्यसर्वतंत्रस्वतंत्रश्रीरंगराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ शिवतत्त्वविवेकाख्यायां शिखरिणीमालायां श्रीसदाशिवस्य विश्वसेव्यव्यवस्थ[ाप*]नन्नाम *etc.*

No. 1015.

Beginning :—

[प्र]णम्य परमात्मानं विद्यातीर्थस्वरूपिणं ।
वैयासिकन्यायमाला श्लोकैस्संगृह्यते स्फुटं ॥

Colophon :— इति श्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थमुनिविरचितायामधिकरणरत्नमालायां चतुर्थाध्याये चतुर्थः पादः.

No. 1016.

Beginning :—

यस्मादभूदभवनानुभवात्सुखाब्धे-
र्विश्वं मरीचिम[रु]वारिरसं मुरारेः ।
तस्यालयो निखि[ललो*]कसुमंगलानां
पुण्यं वपुः प्रकटमस्तु ममार्धसिंहं ॥

यस्याज्ञा[व]शवर्तिनोनुदिवसं ब्रह्मादिलोक . .
[य*]स्यानंदशनांशभागिन इमे श[ा]कादयो निर्वृताः ।
तं सत्यानवधिप्रबोधवपुषं भूमानमाशास्महे
स्वांते . . . . ह[ता]ग्रहवनां . रं सनामंतिकं ॥

यत्पादरेणुकलिलं सलिलं निपीय
मूकोपि मूकयति प[ण्डि]तमण्डला[नि] ।
. . . . मितस्वपदप्रबोध-
न्नि[त्यं*] नतोस्मि . . . . ॥

कल्याणगुणसंपूर्णं निर्वाण . . . . . .
. . . . णेंद्रसर[1] . . . . भजे ॥

श्रीमद्गुरुपदद्वंद्वध्याननिर्धूतकल्मषः ।
कुर्वे तदाज्ञयाद्वैतदीपिकां भेदभेदिनीं ॥

No. 1018.

At the beginning of the Nâgarî copy :—

[2]नमस्त्वैय्यन्तसन्दोहसरसीरुहभानवे ।
गुरवे परपक्षौघध्वान्तध्वंसपटीयसे ॥

भगवत्पादपादाब्जद्वन्द्वं द्वैतनिबर्हणं ।
सुरेश्वरादिसद्भृंगैरवलंबितमहं[3] भजे ॥

बृहदारण्यके भाष्ये शिष्योपकृतिसिद्धये ।
सुरेश्वरोक्तिमाश्रित्य क्रियते न्यायनिर्णयः ॥

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धानन्दभगवत्पूज्यपाद-शिष्यभगवदानन्दज्ञानकृतायां बृहदारण्यकभाष्यटीकायां चतुर्थोध्यायः.

No. 1020.

Beginning :—

ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकल्पितं ।
श्रीमत्स्वयंप्रकाशाख्यं प्रणौमि जगतां गुरुं ॥

---

[1] Read गीर्वाणेन्द्रसरस्वतीं in accordance with *Cat. Cat.* p. 305*b*.

[2] Read नमस्त्रय्यन्त°. [3] Read °सद्भृङ्गैरालम्बित°.

देहो नाहं श्रोनृवागादिकानि
नाहं बुद्धिर्नाहमभ्यासमूलं ।
सोहं सत्यानंदरूपश्चिदात्मा
मायासाक्षी कृष्ण एवाहमस्मि ॥

Colophon:— इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्स्वयंप्रकाशानंदसरस्वती-पूज्यपादशिष्यभगवन्महादेवानंदसरस्वतीविरचितं तत्त्वानुसंधानं समाप्तं.

No. 1021.

Beginning:—

नृसिंहतापनी पूर्वपंचोपनिषदुज्ज्वला ।
खंडानि सप्त चत्वारि चैकं त्रीणि च त्रीणि च ॥

Colophon:— इति श्रीपरमहंसपरिव्राजकाचार्यआनंदात्मपूज्यपादशिष्यस्य श्री-शंकरानंदभगवतः कृतावुत्तरतापनीयोपनद्दीपिका[1] समाप्ता.

No. 1022.

Colophon:— इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकैवल्यानंदयोगींद्रपाद-कमलभृंगायमाणस्वयंप्रकाशयतिना विरचिता श्रीदक्षिणामूर्तिस्तोत्रव्याख्या तत्त्वसुधाख्या समाप्ता.

No. 1024.

Beginning:—

वेदेषु वा तदनुयायिषु वा विचार्य
तंत्रेषु-वाक्यमखिलं प्रतिपादकं ते ।
तात्पर्यसंग्रहमहं विदधे महेश
मह्यं प्रसीद नय मामृजुना पथा त्वं ॥

Colophon:— .

मिथ्याकल्पितभोगमोक्षदवचस्संतानसत्त्वापन-
व्यग्राणामचिरप्रभाविबुधप्रेम्णां महेशद्विषां ।
मूर्धस्वेकदुरात्मनां विरचिता निर्घातवानाः परैः
विद्वद्भिः परमेश्वरश्रुतिकथातात्पर्यसंग्रहकैः ॥

इति श्रीमद्धरदत्ताचार्यचरणकृतौ चतुर्वेदतात्पर्यसंग्रहस्समाप्तः.

No. 1025.

Colophon :—

नाथ तव महिमकलिकाककुभः श्रुत्यंतपारिजातभवः ।
सुरभयतु करुणया तव मीमांसान्यायपरिमळोल्लासः ॥

No. 1026.

Beginning :—

मघवन्मणिगुच्छमंजिमानं
भ्रमरा [बि]भ्रति यस्य कर्णयुग्मे ।
शरणं करवाणि तं पुराणं
करिणं कंचन कांक्षितार्थसिद्ध्यै ॥

वैकुंठस्य यदंघ्रिदर्शनविधौ यत्नोभवत्कुंठितः
चातुर्यं च चतुर्मुखस्य चलितं यन्मस्तकालोकने[1] ।
साकं पर्वतसार्वभौमसुतया चित्ते सदा चिन्मय-
स्सोयं सोमशिखामणि स्फुरतु मे शोणाचलाधीश्वरः ॥

श्रीराजिभिस्सकलदेवशिखामणीनां
नीराजितं निजरुचा जितवारिजातं ।
आपाटलप्रभमपीतकुचांबिकाया-
श्श्रीपादयुग्ममनिशं शरणं प्रपद्ये ॥

विबुधव्रजमानसेषु हर्षं
विदधानं स्वकलाभिरुज्ज्वलाभिः ।
शिवरामसरस्वतीयतींद्रं
हृदि सर्वज्ञशिखामणिं स्मरामि ॥

षड्दर्शनीमहांभोधिचुळुकीकृतकुंभजान् ।
श्रीगोपालाख्ययोगींद्रान् परमेष्ठिगुरून् भजे ॥

वेदांतविद्यानळिनीविकास-
रविप्रकाशायितधीप्रकाशान् ।
गुरून् गुरूणामपि संततं श्री-
स्वयंप्रकाशांश्चरणं[2] प्रपद्ये ॥

---

[1] Compare *South-Indian Inscriptions*, Vol. II. p. 174 f.

[2] Read °शान्छरणं.

अभीप्सितार्थौघमरंदद‍ाना-
त्सदाळिचेतोहरणप्रवीणे ।
पुनः पुनश्श्रीपुरुषोत्तमानां
वंदे गुरूणां चरणारविंदे ॥

अद्वैतविद्यागुरुमग्रगण्यं
षड्दर्शनीसागरपारगेषु ।
प्रचंडपापंडगजौघसिंह-
मखंडयोगींद्रमहं प्रपद्ये ॥

कृतिर्महेश्वरानन्दयतींद्रेण यथामति ।
ज्ञानोपदेशसाराख्या क्रियते कृतिनां मुदे ॥

Colophon :— इति श्रीपुरुषोत्तमानंदसरस्वतीश्रीचरणारविंदशिष्यमहेश्वरानंदसरस्वतीविरचिते ज्ञानोपदेशसा[रे] द्वितीयः परिच्छेदः.

No. 1028.

Beginning :—

[1]जातरससत्वा कमलाभिरामा
बुधप्रिया सत्कविसंघसेव्या ।
गंगा द्वितीयेव सशैललक्ष्म्याः
पादांबुजादीशितुरुद्बभूव ॥[2]
तत्रोदभूत्कोमटिपोलभूपः
स्वकान्ववायैकमणिप्रदीपः ।
लोकत्रयव्याप्तयशःप्रतापः
कृतारिभूपालमनोनुतापः ॥
माचप्रभुर्वेमविभुश्च दोड्ड(स)-
[3]भूपोनुभूपोपि च मल्लभूपः ।
तस्यात्मजा औरसभावकामाः
भूयोवतीर्णा इव पाण्डुपुत्राः ॥
श्रीवेमभूमीरमणस्य तस्य
पुण्यं जनैर्वर्णयितुं न शक्यं ।

---

[1] Read जातिः.   [2] Compare my *First Report*, p. x. note 3.   [3] Read °भूपाश्च°.

खिलीकृतो धर्मपथस्तुरुष्कै-
र्घंटापथो येन कृतः पृथिव्यां ॥

[1]हेमाद्रिकल्पकथिताखिलदानदक्षो
निस्सीमभूवितरणप्रथिमानकीर्तिः[2] ।
सोपानसंततिमसौ प्रविधाय [भूप-
स्तां*] श्रीगिरिशपदवीं सुगमां चकार ॥

वेमाधिपस्यावर[जो]पि मल्लभूवल्लभोसौ जग . . . . .[3] ।
स . . . र्णादितुरुष्कमल्लात्[4] समुल्लसत्भल्लगणान्विजिग्ये ॥

तस्याभवच्छ्रीपिनकोमटींद्रस्सुनो जगभूत . . न . द्रः ।
सर्वप्रजानेत्रचकोरचंद्रस्स्वराष्ट्रसंरक्षणदीननंद्रः ॥

पंच श्रीगिरिभूपतिर्गुणनिधिर्वेमक्ष्मानायको
[5]माचक्ष्वायतिरन्नदेवनृपतिः पेद्दाक्षिनीशोपि च ।
एतस्माद्गुणरत्नराजिततनोः पुत्राः पवित्रान्वयाः
क्षीरोदादमरद्रुमा इव बुधत्राणार्थमभ्युत्थिताः ॥

धानुष्कधौरेयतमांस्तुरुष्कान्
प्रापय्य निष्कासनमात्मराष्ट्रात् ।
निष्कंटकां सर्वभुवं व्यधत्त
स माचभूपो भुजवैभवेन ॥

अभवतामथ कोमटिश्रीगिरी[6]
क्षितिपती अपि माचविभोस्सुतौ ।
बलिबलोन्मथनान्वमुपागतौ[7]
हरिसुराधिपती इव भूतलं ॥

वर्ण्यः कथं कोमटिभूमिपोसौ यस्याक्षिकोणे युधि कोपशोणे ।
दशंति घासं प्रदिशंति देशं विशंत्यरण्यं रिपुभूमिपालाः ॥

---

[1] Compare my *First Report*, p. x. note 4.
[2] Read °प्रथमान°.
[3] Read जगनोब्बगण्ड: in accordance with *Ep. Ind.* Vol III. p. 60.
[4] Read °मल्लान्.
[5] Read °क्ष्मापति°.
[6] The metre requires that the ninth syllable of this line should be short.
[7] Read °नार्थमु°.

कुर्वंतौ महितैर्महोभिरमलैराशानमोनाशनं
सोमेशश्शिवलिंगभूपतिकर[1] द्वौ पुष्पवंताविव[2] ।
सर्वक्षोणिभृदाश्रयाद्गुणनिधेश्श्रीकोमटींद्रांबुधे[3]
आरूढावुदयं शिवस्य महितावंशावतारा[4] भुवि ॥

भरतमतमनंगस्सत्परित्राणचंगः
कृतरिपुमदभंगस्सद्गुणव्यूहतुंगः ।
कलितसुकृतसंगस्त्यक्तपापोत्तरंग-
स्स जयति शिवलिंग[ः*] क्ष्मापवेश्याभुजंगः ॥

सौंदर्यमौदार्यममुष्य शौर्यं
किं वर्ण्यते यस्य हि दर्शनेन ।
स्त्रीणां च मानो विदुषां च दौस्थ्य-
न्द्विषां च शस्त्रं गळति क्षणेन ॥

द्वारे दक्षिणपूर्वे श्रीशैलाख्यस्य भूभृतस्तस्य ।
पुण्यां स्कंदपुरीं तां सोमेशस्सर्वकामदोध्यास्ते ॥

मणिमयगृहहृद्या शत्रुभूपैरभेद्या
गजगमशुभव[ा*]द्या सर्वपुण्यानवद्या ।
कलितसकलकामा भाति रामाभिरामा
विहसितपुरसीमा पूरियं स्कंदनामा[5] ॥

यत्रात्रिणेत्रप्रभवस्तपोभि-
स्सोमं समाराध्य समा[हि]तात्मा ।
सोमत्वमाप्य स्वगभस्तिभाभि-
श्छिन्ते[6] समस्तस्य तमांसि जंतोः ॥

किं वर्ण्य[ते*] पुण्यमहत्वमध्या[7] यस्यास्समीपे विजनाः प्रधानाः ।
एनोरताः पुण्यरता भवंति सोमेशसान्निध्यवशादशेषाः ॥

---

[1] Read °पतिरपि.
[2] Compare *Ep. Ind.* Vol. III. p. 40, note 2.
[3] Read °धेरारू°.
[4] Read °तारौ.
[5] Read °नाची.
[6] Read °श्छिन्धे.
[7] Read पुण्यमहत्त्वमस्या.

हैमं समारोहति तत्र पुर्यां सिंहासनं श्रीशिवलिंगभूपे ।
हैमानि हेमाद्रिशिलासनानि तदीप्र्ययेवारिनृपाश्श्रयंते ॥

माहेश्वरेण शिवलिंगमहीश्वरेण
माहेश्वरत्वमखिलाः कलयंति लोकाः ।
आमोदिनाखिलदिशावलयेन यागात्
भद्राश्रि[या]वनिरुहा इव चंदनत्वं ॥

ब्रह्मण्यो [1]गोस्सहस्रं समधित मुदिन[:*] स्वर्णराशीननेका-
[2]नग्र्यानप्यंगहारानतनुत विनना देवतानां प्रतिष्ठा[:*] ।
ब्रह्मोद्वाहाद्ध हूनप्यकृत[3] सुकृतिनामग्रणीः पुण्यचेता-
स्तत्किन्नामास्ति पुण्यं व्यधित न यदयन्धूर्जटिप्रीतिकामः ॥

श्रीगंगाधरवंशवार्धिरजनीनाथस्य विद्यानिधे-
र्नप्ता श्रीत्रिपुरांतकस्य सुधियः पौत्रो गुरोश्श्रीगिरेः ।
पुत्रश्श्रीत्रिपुरानिदेशिकमणेर्भीमेश्वरस्यानुजो[4]
यस्य श्रीगिरिदेशिको गुरुरभूत् श्रीकोंडयोगीकृतः ॥

गुरुं तमाराध्य स तत्कृपात्तसर्वप्रतापश्शिवलिंगभूपः ।
व्याचष्ट हृद्यां हरदत्तसूरिकृतां गिरीशश्रुतिसूक्तिमालां ॥

No. 1031.

Beginning :—

अंबागृहीतवामार्धं वंदे चंद्रकळाधरं ।
लावण्यमधुराकारं कारुण्य[रस]वारिधिं ॥

कैवल्यानंदयोगींद्रपादकंजरजोरविः ।
राजते मे हृदाकाशे मोहध्वांतनिवर्तकः ॥

शुद्धानंदपदांभोजद्वंद्वं सेवे यदुद्भवं ।
निर्वाणरसमा[स्वा*]द्य हृष्टाश्शिष्यालिपङ्क्तयः ॥

सच्चिदानंदयोगींद्रा जायंते[5] भुवि केचन ।
[6]यत्कृपाबल्वतस्तीर्णो मया संसारवारिधिः॥

---

[1] Read गाः. [2] Read °नप्यग्रहारा°. [3] Read °ह्मान्बहू°.
[4] Read °त्रिपुरारि°. [5] Read जयन्ति. [6] Read यत्कृपाप्लवत°.

इह खलु लक्ष्मीधरो नाम कश्चित्कवीन्द्रः *etc.*

Colophon :—

अद्वैतमकरंदस्य रसाभिव्यंजिका कृता ।
स्वयंप्रकाशयतिना पुरुषोत्तमशासनात् ॥
ब्रह्मानंदरसास्वादमिच्छत् भुवि बुधोत्तमैः[1] ।
रसाभिव्यंजिका सैषा परिशील्या सदादरात् ॥

No. 1033.

Beginning :—

विधूतविज्ञानार्थकल्पनं (?) कल्पनास्पदं ।
अनन्तान्ददसंदोहं[2] तं वन्दे पुरुषोत्तमं ॥
यस्य प्रसादमासा[द्य] सद्गतिं बहवो गताः ।
तमहं प्रत्यहं वंदे शुद्धानंदं परं गुरुं ॥

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छुद्धा[नंद]पूज्यपादशिष्य-श्रीमदानंदगिर्याचार्यकृतावात्मज्ञानोपदेशविधेर्भगवत्पादीयस्य टीका समाप्ता.

No. 1035.

Beginning :—

जगज्जन्मस्थेमाप्ययनियमसीमादिमगुरु-
र्विचेयो योगेनानिदमुदयवाचामवधिषु ।
प्रकाशानंदात्मा परिमुषितनिश्शेषकलुष-
स्त्रिभेदातीतो धीर्नटनचरसाक्षी[3] विजयते ॥
स्वालोकक्षणविक्षुतस्वपरधीभेदेन्यराजन्यके
साकूतस्मितविश्रमांचितमुपायांत्या निजस्यंदनं ।
रुक्मिण्या मिषति त्वशेषदिविषद्वर्गे रथारोहण-
व्याजालिंगनतो हरेरवतु न स्तैमित्यमानन्दजं ॥
परिचयमुपयामो भारतीपादपद्मे
यदुपनिहितलाक्षापंकलक्ष्म्यमुद्रा ।
प्रणयकलहनम्रे पद्मभूमौलिदेशे
प्रथमशराविलासं पंचबाणस्य धत्ते ॥

---

[1] Read °च्छद्भिर्विबुधोत्तमैः. [2] Read अनन्तानन्दसं°. [3] Another copy reads धीनटनबद्ध°.

ये वेदांतसुधोदधिं सुमनसां निश्श्रेयसाय स्वयं
निर्मथ्योदहरन्निरूपणगुणात्ततेन चेतोमथा ।
अद्वैतामृतमासुरानुशयिनामास्वादनीयेनर-
न्तान[ा]स्माकगुरोरुपैमि[1] भगवत्पादादिमान् देशिकान् ॥

संपद्यन्ते सरसिरुहभूसंपदः किंपचानाः
लिंपन्त्यंतःकरणमिह यन्नैव नैलिंपभोगाः ।
संपत्सा नस्समजनि यतस्सानुकंपैरपांगै-
स्तं पर्येमि प्रणतिभिरहं वासुदेवं यतींद्रं ॥

संतस्संतु सहस्रशस्समदृशस्सर्वप्रियंभावुका
जागर्ति त्रिजगद्गुरुर्मनसि नश्श्रीरामभद्रो यमी ।
औदासीन्यमनादृतावधि दया सांद्रा धुतादिश्शम-
श्शब्दब्रह्म परं च यस्य विषये लोकोत्तरं वर्तते ॥

[2]श्रीमत्परहंसावतंसं चतुराननतव्यदिव्यगतिशीलं ।
श्रीमत्स्वयंप्रकाशं परमगुरुं नौमि योगीशं ॥

येन ज्ञानदृगंचिता न रजसा संक्षुभ्य संक्षिप्यते
शश्वत्पश्यति शांतसंततमःप्रत्यूहमंतर्हितं ।
तृष्णादूषिकया न दुष्यति न वा निद्राति तत्तादृशं
कृष्णानंदसरस्वती वितनुते सिद्धांतसिद्धांजनं ॥

No. 1036.

Beginning:— * * *

[यस्याः*] कटाक्षलेशेन मूकस्यापि प्रगल्भता ।
जायते सर्वशास्त्रेषु भारतीं तां नमाम्यहं ॥

कर्पूरगौरवपुषं कलितेंदुमौलिं
कांताजनेन कबळीकृतवामभागं ।
कंदर्पदर्पदमने कृतलीलमाद्यं
कारुण्यवारिधिमहं कलयामि चित्ते ॥

---

[1] Read ॰रन्तानस्माकगुरून्नौमि.

[2] Another copy reads correctly श्रीपरहंसवतंसं.

यद्वीक्षाविषयं विनेयनिवहं प्रीत्या भजंते स्वयं
लक्ष्मीकीर्त्तितरस्विनीधृतिदयाश्रीशांतिदांत्यादय. ।
कृष्णानंदसरस्वती शमरसं चित्ते मदीये शुभे
नित्यं सन्निहितोस्त्वसौ मम गुरुर्ध्वांतापनुत्यै विभुः ॥
यदुपदे[श*]वशान्मम शेमुषी गहनमर्थमपि स्फुटयत्यसौ ।
विजयराघवशास्त्रिणमाश्रये गुरुमहं तमशेषगुणाकरं ॥
ग्रामे पल्यकचेरिनाम्नि महिते विद्वज्जनालंकृते
यज्वा याजयिता च वेंकटपतिर्नाम्ना शिवे भक्तिमान् ।
अस्ति श्रीहरितान्वये समुदितश्श्रुत्यर्थनिर्णायक-
स्सूत्रेषु त्रिषु कल्पसंज्ञिषु पटु . . . विज्ञाग्रणीः ॥
तत्सूनुर्विष्णणोत्येष सिद्धांजनकृतिं गुरोः ।
सर्वतोमुखयागस्य कर्त्ता भास्करदीक्षितः ॥

No. 1037.

Colophon :—

भूमिर्भ्राम्यति बुद्ध . . मरितः प्रत्यग्भ्रमण्यद्रुते
भ्र[ा*]म्यंते च सहाश्रयेण दिवि च ज्योतींषि सर्वाण्यपि ।
आवर्त्तोथमपां[1] भ्रमः परिणतो मूर्त्तिश्शिवस्याष्टमी
यासावप्पयदीक्षितस्स जयतीत्येका निरस्तभ्रमम् ॥[2]

शिवोत्कर्षस्तवरत्नं संपूर्णम्.

No. 1038.

At the end of one of the *adhyâyas* :— श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यसर्वतंत्रस्वतंत्रचतुरधिकशतप्रबंधनिर्वाहकविश्वजिद्याजिश्रीरंगराजाध्वरिवरसत्सुतमहाव्रतयाजिश्रीमदप्पयदीक्षितपादानां कृतौ चतुर्मतसारसंग्रहे न्यायरक्षामणौ प्रथमस्याध्यायस्य प्रथमः पादः.

No. 1040.

Beginning :— अथ श्रीमद्भारतस्य शिवपारम्यव्याख्यानपरतामाविष्कर्तुं कृतस्य शिवस्तोत्रस्यायमाद्यः श्लोकः.

---

[1] Read °र्तोयमपां.

[2] The purport of this incomplete verse is that, while seven of the eight forms of Śiva are subject to *bhrama*, the eighth, *viz.* the Dikshita (in the present case Appayadikshita), is free of it.

No. 1041.

Beginning :—

वीरामने समासीनं विद्युत्पिंगजटाधरं ।
करांकुरितचिन्मुद्रं कंचिद्देशिकमाश्रये ॥
वि[द्या]मरंदनिष्यंदनंदच्छिष्यमधुव्रत[1] ।
श्रीमत्परशिवेंद्रश्रीपादपद्ममुपास्महे ॥
नत्वा व्यासमुनिं सूतसंहितायां परात्मनः ।
[2]ऐक्यप्रकारकस्सारसंग्रहः क्रियते मया ॥

No. 1042.

Beginning :—

विज्ञापनार्हविरळावसरानवाप्त्या
मंदोप्रमे[3] मयि दवीयसि विश्वमातुः ।
अव्याजभूतकरिणापवनापविद्या-[4]
न्यंत[:*] स्मराम्यहमपांगतरंगितानि ॥

No. 1050.

Colophon :— श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यविश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्पयदीक्षितस्य शिवकर्णामृतासिद्धांतसंक्षेपस्समाप्तः.

No. 1051.

Beginning :—

अनुवर्णितरामकृष्णवृत्तैरनुलोमप्रतिलोमवाचनाभ्यां ।
कृतिमुल्लसितां विधाय पद्यैर्विवृणोति स्वयमेव वेंकटार्यः ॥

No. 1054.

Beginning :—

श्रीमदद्वैतस्थापकशंकरभगवत्पादेभ्यो नमः ॥
शुद्धानंदोरुसंवि[द्*]द्युतिबह[लव*]लौदार्यवीर्यादिदेहं
चिंतासंतापलेपोद्भवमतिमुखराशेषदोषातिदूरं ।
सद्भिर्वैराग्यभक्तिश्रुतिमतिनियतध्यानजज्ञानयोगात्
गम्यं वंदे मुकुंदाभिधममलमलं ब्रह्म वेदांतवेद्यम् ॥

---

[1] Read °नन्दच्छिष्य°.   [2] Read °प्रकाशकः.   [3] Read मन्दप्रमे.
[4] Read °करुणापवनापविद्धा°.

याश्रामंदरल्लोलिनाद्यन[1] उदेद्धिर्येदिरा निर्जरैः
जातो भारतपारिजाततनुतरुस्त्वब्रह्मसूत्रामृतं[2] ।
आसीत्तंत्रपुराणसन्मणिगणो जातश्शुकेंदुस्सदा
सोयं व्याससुधानिधिर्भवतु मे भूत्यै सदा भूतिदः ॥

स्वांतध्वांतनिकृंतनने जितमहार्वकर्तनांशुव्रजं
निर्दोषं जितचंद्रिकमलत्नापत्रयोन्मीलने[3] ।
गांभीर्ये जितसिंधुराजममितं भाष्यं यदास्यांबुजा-
दाविर्भूतममंदबोधभगवत्पादान् प्रपद्येथ तान् ॥

श्रीमध्वसंसेवनलब्धशुद्धविद्यांबुदांभोनिधयोमला ये ।
कृपालवः पंकजनाभतीर्थाः कृपालवस्स्यान्मयि नित्यमेषां ॥

श्रीमद्रमारमणमद्रिरिपादसंगिव्याख्यानिनाददलिताखिलदुष्टदर्पं ।
दुर्वादिवारणनिवारणदक्षदीक्षमक्षोभ्यतीर्थमृगराजमहं नमामि ॥

अथैतत्कृपया ब्रह्मसूत्रभाष्यं यथामति ।
व्याकुर्वे श्रीमदानंदतीर्थाख्यमुखनि[ः*]सृतं ॥

Colophon :— इति श्रीमदानंदतीर्थविरचित(स्य)श्रीमद्ब्रह्मसूत्रभाष्यटीकायां जयतीर्थविरचितायां तत्वप्रकाशिकायां प्रथमस्याध्यायस्य प्रथमः पादः.

No. 1056.

Beginning :—

महापाशुपतज्ञानसंप्रदायप्रवर्तनात्[4] ।
अंशावतारानीशस्य योगाचार्यानुपास्महे ॥

आसेतुबंधतटमा च तुषारशैला-
दाचार्यदीक्षित इति प्रथिताभिधानं ।
अद्वैतचित्सुखमहांबुधिमग्नभाव-
मस्मत्पितामहमशेषगुरुं प्रपद्ये ॥

---

[1] Read °लोडितायत उदेद्रि°.

[2] Read °तरुः सब्रह्मसूत्रामृतः.

[3] Read जितचन्द्रचन्द्रिकमलं तापत्रयोन्मूलने.

[4] Read °वर्तकान्.

यं ब्रह्म निश्चितधियः प्रवदंति साक्षा-
त्तद्दर्शनादखिलदर्शनपारभाजः ।
तं सर्ववेदसमशेषबुधाधिराजं
श्रीरंगराजमखिनं पितरं नतोस्मि ॥

यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानां च निष्ठा
साकं सर्वे[1] पुराणस्मृतिनिकरमहाभारतादिप्रबंधैः ।
तत्रैव ब्रह्मसूत्राण्यपि च विमृशतां भांति विश्रांतिमंति
प्रत्नैराचार्यरत्नैरपि परिजगृहे शंकराद्यैस्तदेव ॥

तथाप्यनुग्रहादेव तरुणेंदुशिखामणेः ।
अद्वैतवासना पुंसां आविर्भवति नान्यथा ॥

अनुग्रहश्च देवस्य शक्त्या चिद्रूपया सह ।
यथावत्तं परिज्ञाय ध्यायद्भिस्समवाप्यते ॥

Colophon :— इति श्रीशिवादित्यमूर्धन्यशिवदर्शनस्थापनधुरंधरसकलदेवभूदेवप्रतिष्ठापकश्रीमच्चिन्नबोम्मभूपालहृदयकमलकुहरविहरमाणश्रीमत्सांबशिवप्रेरितस्य श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीविश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ श्रीकंठाचार्यविरचितश्रीब्रह्ममीमांसाभाष्यव्याख्यायां शिवादित्यमणिदीपिकायां प्रथमस्याध्यायस्य प्रथमः पादः.

At the end of the 4th *pâda* of the 4th *adhyâya* (in a separate volume) :— इति श्रीमदनुकूलगोत्र - गंडरगंड - प्रभुत्वभंड - पंडितपुंडरीकमार्त्तांड - पंचपांड्यपूजालिंग - बल्लाळरायमनोभयंकर - बन्द्रपरायस्थापनाचार्य - नेल्लूरिवीरक्षेत्रकमल्ल - चनपकरगंड - कुल[ ]त्पु[ ]वरनायकरगंड[2] - कुडित . गंड - कुडिकानुवरनायकरगंड - रूपनारायण - श्रीरामकांबागर्भशुक्तिमुक्ताफल - चिनवीरधरणीपतिभाग्योदय - लिंगमनायकपूर्णचंद्रसुधासमुद्र - शिवातिवादिमूर्धन्य - शिवदर्शनस्थापनधुरंधर - सकलदेवभूदेवप्रतिष्ठापक -[3] श्रीमच्चिन्नबोम्मनृपालहृदयकमलकुहर *etc.* चतुर्थस्याध्यायस्य चतुर्थः पादः.

---

[1] Read सर्वै .   [2] Read (in Kanarese) कुलक्के तप्पुव नायकर गंड.

[3] Compare *Ind. Ant.* Vol. XIII p. 127, note 17, verses 37 to 59.

No. 1063.

Beginning :—

. . . . वेद्यमानं
ब्रह्माद्वैतं भजामस्सशिवमपि शिवं त्यागविद्याविनोदं ॥
श्रीमद्वीथिविटंकशंकरकृपामारीभवत्साहिनी-
त्रैविद्येन कृतार्थयन्कविवरान् विद्वज्जनग्रामणीः ।
श्रीगोविंदमखींद्रनंदनमखिश्रीयज्ञनारायण(:)-
स्फीनाद्दष्टकृतोदयो विजयते श्रीवेंकटेशाध्वरी ॥
तेनायं महितः फणीश्वरफणामाणिक्यसम्मंडिते
त्यागेशांघ्रियुगे फणींद्ररचितां तां भाष्यरत्नावलीं ।
सारामर्पयतेर्थपुष्टिनिपुणां प्रीत्यै भवानीपते-
स्संस्कारज्वालितां नमः प्रणुदतीं श्रीचोक्कनाथस्सुधीः ॥
धातारं सूत्रकारं शिवनुतिमुहितं पाणिनिं वाक्यकारं
विष्णुं कात्यायनं तं गिरिशमहिवराधीश्वरं भाष्यकारं ।
तातं नारायणं श्रीगणपतिमपि तां मातरं सादरं ता-
नाचार्य्यान् सर्वतंत्रप्रणयननिपुणानानमेः[1] कर्म कुर्मः ॥
धीमद्वाक्यपदप्रमाणगहनप्रच्छादितोच्चावच-
स्फीतार्थप्रतिपादनार्थनिपुणश्श्रीनीलकंठाध्वरी ।
यं भाष्यप्रकटीकृतौ पटयते द्वेधार्थदानात्कृतिं
तस्यान्ये सुधियः कथं न विमलाः पुष्णीयुरर्थप्रदाः ॥[2]

Colophon :— इति श्रीद्वादशाहयाजिपुत्रचोक्कनाथविरचितायां भाष्यरत्नावल्यां प्रथमस्याध्यायस्य प्रथमे पादे नवममाह्निकम्.

No. 1064.

Beginning :—

[ह]रिणांककलोज्ज्व[लो]त्तमांगं करुणापूरकरंबितांतरंगं ।
. . . .

[1] Read °नानतेर्धाम (?).

[2] In another manuscript the second half of the verse runs :— यं पुष्णाति सुपुष्कलार्थनिकरैस्तस्मै न किं तिष्ठते सोर्थस्तस्य कृतिं विशुद्धहृदयाः पुष्णंति के नो बुधाः ॥

. . . . . स्थिनिळयाकारो विलासोदयो
देवो विग्रहमद्भुतं वहति यष्पड्भिर्मुखैरुज्ज्वलं ।
श्रेयस्संनतिमातनोति सदयं यद्वीक्षणं प्राणिनां
वाग्गुंभेपु[1] स एष मे घटयतु प्रागल्भ्यमन्यादृशं ॥

यदनुग्रहमात्रेण तंत्रार्था विशदीकृताः ।
कलये यतिवर्य्यांस्तान् देशिकान् कांश्चिदद्भुतान् ॥

मध्ये कल्पितभावरत्नमभितो वज्रोपमैरुज्ज्वलं
न्यायैरद्भुतयुक्तिमौक्तिकगणैरावेष्टितं दर्पणं ।
तंत्रार्थस्फुटवीक्षणाय तनुते शब्दैस्सुवर्णात्मकै-
श्श्रीमद्रामबुधात्मजस्सविनयस्स श्रीमदण्णासुधीः ॥
षडाननकृपालब्धप्रगल्भमधुरोक्तिभिः ।
भेदलक्षणमारभ्य कलये तन्त्रदर्पणं ॥

Colophon :— इति श्रीप्रयागकुलकलशसिंधुकौस्तुभस्य श्रीमत्कंडरमाणिक्यग्रामरत्ना(अ)भिजनस्य वल्लीदेवसेनासमेतश्रीसुब्रह्मण्यकरुणाकटाक्षलब्धविद्यावैशद्यस्य नपालग्रामवासिनश्श्रीमदण्णाशास्त्रिणः कृतौ तंत्रदर्पणे द्वितीयस्याध्यायस्य चतुर्थः पादः.

No. 1068.

At the end of the 9th *adhyâya* :—

श्रीहोन्नार्यस्य पौत्राच्छिवगुरुसदृशान्मल्लयज्वाख्यपुत्रा-
ज्जातो मल्लाध्वरींद्रात् परगिपुरवरस्थायिनस्तम्मयज्वा ।
सिद्धांतस्यार्कनाम्नः कलितपदवतीं कामदोग्ध्रीं सुटीकां
दृश्यादृश्यस्य सम्यग्रविगुरुकृपया प्रोक्तवानंबिकायै ॥

इति श्रीसूर्यसिद्धांतस्य व्याख्याने उदयास्तमयाध्यायो नवमः ।

No. 1070.

Beginning :—

श्रेयःपदं दिशति यस्य कटाक्षलेशो
भास्वानिव प्रकटयत्यपि तत्वजातं ।
तं कौशिकान्वयपयोनिधिपूर्णचंद्रं
श्रीश्रीनिवासगुरुमन्वहमाश्रयामि ॥

[1] Read वाग्गुम्फेषु.

. . . . येमे विश्वनिर्माणदक्षौ
विविधशुभगुणाढ्यौ विश्वरक्षैकदीक्षः ।
विमलहृदयलक्ष्मीवीक्षणीयास्यचंद्रौ
वरुणनिलयकन्यावल्लभौ वाजिवक्रूः ॥

रामानुजा . . . . भवेनाः[1]
प्रत्यर्थिपक्षदलनोद्यतवाग्धुरीणौ ।
मानैः प्रसिद्धविभवैः परजीविभेदैः
प्रत्यर्थिभंगकरणाय महागुरू नः ॥

Colophon :— इति श्रीकौशिककुलजलधिशिशिरकरनिगमशिखरवेद्यविद्याकुमुदिनीविकासकरस्य वेदांताचार्यस्य भागिनेयेन वत्सकुलतिलकेन नृसिंहदेवेन विरचिते भेदधिक्कारन्यक्कारे द्वितीयः परिच्छेदः.

No. 1072.

Beginning :— सुंदरोक्तया व्याघ्रपुरनिवासिना निगमज्ञानदेशिकेशेन नंदिकेशायोपदिष्टानि शिवज्ञानबोधसूत्राणि उपन्यस्यन्ते.

No. 1074.

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्यअभिनवनारायणेंद्रसर[स्व*]तीपूज्यपादशिष्यश्रीमत्परमशिवेंद्रसरस्वतीविरचितायां शिवगीतातात्पर्यप्रकाशिकायामष्टमोध्यायः.

No. 1090.

Beginning :—

मानवात्रेयवैज्ञानेश्वरकालामृतादिकान् ।
दृष्ट्वा वरदराजीयचंद्रिकादत्तसंग्रहान् ॥
कालनिर्णयमुख्यांश्च दत्तमीमांसया सह ।
पर्यालोच्य यथाबुद्धि युक्तिसारान् परीक्ष्य च ॥
दत्तरत्नाकरं नाम कुर्वेहं विदुषां मुदे ।

Colophon :— इति श्रीधर्मराजाध्वरिविरचितो दत्तरत्नाकरस्संपूर्णः.

---

[1] Read भवेतां.

No. 1091.

Beginning :—

मिताक्षरादिप्राचीनग्रंथानालोच्य सर्वशः ।
दत्तचिंतामणिं कुर्वे दत्तशास्त्रशिखामणिं ॥[1]

No. 1094.

Beginning :—

वंदे वेतंडवदनं यच्छुंडा लीलयोद्धृता ।
ब्रह्मांडमंडपारंभस्तंभतां लभते क्षणं ॥
वाणी तांडवमाधत्तां मज्जिह्वारंगमंडपे ।
हृद्या यद्भूमिकालीला विद्यावेदपुरस्सरा ॥
अभूदभूतप्रतिमे महेश्वरे
निरुद्धचेता निगमान्तपारविन् ।
कलानिधिः कौशिकवंशवारिधेः
कविः प्रतीतः कविवादशेखरः ॥
जन्मनः प्रभृति देवनांतरं यन्मनः परिविधूय केवलं ।
कामिनीकवलितार्धविग्रहं यामिनीरमणचूडमन्वगात् ॥
हेमाद्रेरिव यस्यासीन्नान्यस्मै नमितं शिरः ।
अन्तरेण महादेवं हन्ता[रं] त्रिसृणां पुरां ॥
श्रीकंठदर्शननिरूपणभाग्यलक्ष्मी-
सिंहासनप्रथमदेशिकतानिबद्धः ।
पट्टाभिषेचनविधौ[2] प्रथितः पृथिव्या-
मेकाम्रनाथसविधेजनि यस्य कांच्यां ॥
तमादिशत्तापसवेषधारी स्वप्ने कदाचित् स्वयमेत्य शंभुः ।
निजापदानैर्निखिलैरुपेतं प्रबंधमेकं परिकल्पयेति ॥
तत इदमभिजातगद्यपद्यं
प्रतिपदपल्लवितप्रसादरम्यं ।
अकृत स [3]कविवादिशेखरोयं
शिवचरितं रसभासुरं प्रबंधं ॥

---

[1] See p. 145, l. 2 f. [2] Read °विधिः. [3] Read कविवाद°.

* * *

कविनामौक्तिकं यस्य त्रैलोकीतिलकायते ।
क्षेमेंद्राय कवींद्राय क्षेममाशास्महे वयं ॥

* * *

स जयति हरदत्तस्सर्वविद्याधिपत्ये
पशुपतिवरदत्तो यस्य पट्टाभिषेकः ।
दिशि दिशि विनतानां यद्यशोमंजरीणां
परिमळपरिवाहे मज्जतीव प्रपंचः ॥

Colophon:— इति कविवादशेखरकृतौ शिवचरित्रे मार्कंडेयपरित्राणकालमथनकथा समाप्ता.

No. 1096.

Beginning:—

वंदे गंडतटद्वंद्वस्यंदमानमदांबुधौ ।
कृतमज्जनलीलाळिकलभं कलभाननं ॥
श्रीमदंघ्रिकमंजीरसमुदंचितशिंजितैः ।
[1]शब्दान्वशासनं कुर्वन् पातु हेमसभानटः ॥

एकं तु तत्त्वं भुवने . . . सदाशिवश्शांत इति त्रिरूपम् ।
तेनोपपन्नः परमो गुरुर्य्यो निगद्यते प्रत्यहमागमज्ञैः ॥
अनंतकश्श्रीगळशैलकन्याकुमारविष्णु[द्रु]हिणाभिधानैः ।
पुनस्स एवापर उच्यते यस्स एव बोधोदयहेतुभूतः ॥
श्रीदुर्वासाः पैंगळाचार्य्य उग्रज्योतिस्सद्योज्योतिरीशागमज्ञाः ।
श्रीकंठः श्रीविष्णुकंठस्सुबोधो विद्याकंठो रामकंठो मनीषी ॥
ज्ञाताशेषप्रौढगाढागमार्थान्
प्रीताशेषक्षोणिकान् दृग्विलासैः ।
जातानंदद्योतिमानानुभावा-[2]
नेतान् वंदे देशिकेंद्रान् कुलीनान् ॥

---

[1] Read शब्दानु°.

[2] Read °द्योतमाना°.

करत्ता[1] ज्ञानशिवेन तत्र गुरुणा श्रीज्ञानरत्नावली
ज्ञानाख्यादिमशंकरेण च कृता सा बालरत्नावली ।
अन्य(ा)स्सोमशिवेन साधु रचित(ा)स्तत्कर्मकांडक्रमो-
प्युत्तुंगेन शिवेन पद्धतिरियं नामानुकूला कृता(:) ॥

ब्रह्माख्याप्रथमेन शंभुगुरुणा नामानुरूपा कृता
प्रोक्तार्यं[2] त्रिविलोचनेन विदुषा सिद्धांतसारावली ।
श्रेष्ठोयं हृदयाख्यदेशिकसता सिद्धांतदीपः कृतः
मुख्या वारुणपद्धतिर्वरुणनाम्नेयं [3]शिवोनोदिना ॥

अन्यच्चारुतरं क्रियाकरणकं सन्मंडनं निर्मितं
प्रासादाख्यशिवेन देशिकनटेशेन स्वनाम्नोचितम् ।
नाम्ना स्वस्य च रामनाथ(क)विदुषा सा निर्मिता पद्धतिः
श्रेष्ठेशानशिवेन नैपुणवता सिद्धांतसारः कृतः ॥

एषामद्भुतपद्धती रच(र)यतामाचार्यवर्यात्मना-
मष्टाविंशतिशैवतंत्रजलधींरामध्य(ज)मामज्जतां ।
शैवाचारविधानदुर्गमवनक्रीडामृगेंद्रात्मना-
मंघ्रींनंबुजकांतिकंदळजुषो वंदे मतिस्फूर्तये ॥

आत्मार्थपूजाविधये बुधानामत्यंतनित्यार्चनलालसानां ।
संगृह्य सारांशकमागमेषु सर्वेषु वक्ष्ये प्रकटं सुखेन ॥

Colophon :— इत्यात्मार्थपूजापद्धत्यामुक्तेशोविधिः (?) ।

श्रीमत्व्याघ्रपुरीवासिवेदज्ञानमुनेः पुरे ।
श्रीपादपंकजद्वंद्वधूळीधूस[र]मस्तकः ॥

तन्नाम(:)धारी तच्छिष्य[:*] स्वागमोक्तिनिदर्शनैः ।
आत्मार्थपूजाव्याजेन कृतवान् शैवमाह्निकं ॥

इत्यात्मार्थपूजापद्धतिनित्यविधिस्समाप्तः.

[1] Read कृता. [2] Read प्रोक्तेयं. [3] Read शिवेनो°.

No. 1101.

Beginning :—

विपद्यंते सं ाःस्समुदिनपरानंदरसिका-
[स्स*]मुन्निद्रैर्भावैश्श्रुतिशिखरविश्रांतमनसः ।
निरातंकं लंकाप . . . .
प्रवीणो यस्सोयं दिशतु मम कल्याणलहरीं ॥

अपि च ।

पालितवसुदेवकुलं चालितगोवर्धनाद्रिमूलतलं ।
बालं कमपि तमालच्छायं कलया[मि गो]पिकालोलं ॥

किं च ।

चेते।मंडपनाटन्मृडजटा[जू]टभ्रमत्स्वर्धुनी-
[1] [illegible]व्याख्यानकोलाहलः ।
गाधेयान्वयवारिधेस्समुदयन् राकानिशाकामुकः
[जज्ञे] सर्वबुधोपलालितयश[ा*]श्श्रीरत्नखेटाध्वरी ॥

तस्यासीदतनुश्रीकस्तनयो विनयोज्ज्वलः
गाधेयवंशपाथोधिचंद्रमाः केशवाध्वरी ॥
ततोजनि बुधोत्तंसः पतंजलिमखीश्वरः ।
यस्य कीर्त्तिसुधाधौतदिग्भित्तिर्लोकमंडपः ॥

आजान[2] सिद्धयशसां सततं गुरूणां
पादारविंदपरचिंतनवीततंद्रः ।
श्रीरामचंद्रमखिराडिति विश्रुतोसौ
चंपूप्रबंधरचनासु कृतोद्यमोस्मि ॥

Colophon :—

कर्णावतंसः कविपुंगवानां देव्या गिरां भूषणरत्नमिन्धे ।
श्रीरामचंद्राध्वरिशेखरस्य चंपूप्रबंधे स्तबकस्तुरीयः ॥

---

[1] The noun *ārbhaṭikā* has to be derived from the Kanarese *ārbaṭa*, 'crying aloud.'

[2] Read आजन्म.

No. 1104.

Colophon :— विस्तरस्तु अस्मत्पितामहअश्वत्थनारायणशास्त्रिविरचिते श्रीरामनाममहिमोल्लासे द्रष्टव्यः ।

वेदे तदर्थेष्वखिलेपि तंत्रे तदुक्तमत्कर्मविधौ प्रवीणाः ।
अश्वत्थनारायणसूरिवर्या[1] त्रैलोक्यसंव्याप्तयशोतिरेकाः ॥
तेषां नारायणांशानां पुत्राः परमधार्मिकाः ।
रामशंकरनामानो भारतीरमणांशकाः ॥
स्मृत्यर्थपा[र*]दृश्वानः तेषां पुत्रस्त्वनामतः ।
राममुब्ब इति ख्यातः हरिदासवराभिधः ॥
कृतवान् कुतुकादेव प्रबंधं श्रीपतेर्मुदे ।
इति राममुब्बशास्त्रिविरचितं मततत्त्वरहस्यं संपूर्णम्.

No. 1105.

Beginning :—

चंद्रार्धचूडचरणाब्जयुगं प्रणम्य
वागीश्वरीं गणपतिं क्रमतो गुरूंश्च ।
लेशाद्यथामति . . . . . युक्तिगूढं
श्रीमन्मृगेंद्रपरमार्थमहं व्यनज्मि ॥
केचित्स्वबोधविभवप्रथनाय ताव-
द्रर्जंत्यलं न किल यत्प्रकृतोपयोगि ।
अन्ये पुनः पटुधियो न विवेचयंति
स्पष्टार्थमेतदिति तत्तदुपेक्षमाणाः ॥
संक्षेपतः प्रकृतवस्तु परिस्फुटं ये
व्याचक्षते पदपदार्थसमन्वयेन ।
प्रायः कुशाग्रमतिभिस्तदिहाद्रियंते
व्याख्याकृतो विफलविस्तरभीरुभिश्च ॥

---

[1] Read °वर्याश्च°.

साक्षात् श्रीकंठनाथादिव सुकृतिजनानुग्रहायावतीर्णा-
च्छ्रुत्वा श्रीरामकंठाच्छिवमतकमलोन्मीलनप्रौढभास्वान् ।
श्रीविद्याकंठभट्टस्तदिदमुपदिशन्नादिदेशैकदा मां
स्पष्टार्थामत्र लघ्वीं विरच[य्य] विकृतिं वत्स सर्वोपयोग्यां ॥
उपर्युपर्येव कृतानि कैश्चिन्मतांतराणां हि निबंधनानि ।
नाद्रिन्नमुद्रन्त्विदमद्य यावत्तस्माद्गुरुर्म्मामिदमन्वशात्सः ॥
तेनाहमस्यां विवृतौ प्रवृत्तो नोल्लंघनीया हि गुरोरनुज्ञा ।
यदृच्छया(म्) कोनिग(म्)भीरशब्दं मृगेंद्रमाक्षेप्तुमिदं व्यवस्येत् ॥

Colophon :— इत्यघोरशिवाचार्य्यविरचितायां श्रीमन्मृगेंद्रवृत्तिदीपिकायाम् अध्व-प्रकरणम्.

No. 1106.

Beginning :—

अनुकूलस्मृतिस्नेहादाप्तोक्तिवग्वृत्तिकां ।
शैववर्गपरिग्राह्यां करोम्याशौचदीपिकां ॥

Colophon :—इति शैवागमाशौचं संपूर्णम् ।

No. 1107.

Beginning :—

नित्ये नैमित्तिके काम्ये दोषध्वांतनिवारिकां ।
वक्ष्ये शैवोपकाराय प्रायश्चित्तप्रदीपिकां ॥

No. 1111.

At the end of one of the *adhyâyas* :— इति सोमशंभुविरचितायां क्रियादीपिकायामंकुरार्पणविधिः. Compare Dr. Aufrecht's *Cat. Cat.* p. 736*b*.

No. 1113*b*.

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमच्छंकरभगवत्पादाचार्य्यविरचिता श्रीमृत्युंजयमानसिकपुजाविधिस्समाप्ता (!). Compare *Mânasapûjâvidhi* in Dr. Aufrecht's *Cat. Cat.* p. 452*a*.

No. 1114.

Beginning :—

ओतं येन जगच्चराचरमिदं प्रोतं च सर्वं सदा
च्योदंते[1] पशवोपि पाशनिकराद्यस्य प्रसादेन तन् ।
ओमित्यादिमरुच्चरद्ध्वनिगनं ज्योतिष्मनां द्योनकं
व्योमव्यापि परं शिवाख्यमकलं ज्योतिः प्रपद्ये धिया ॥
श्रीम[द्दै]ग्रेशलिंगं परममुनिगणैस्सेवितं सत्पदार्थैं
स्वस्य प्राच्यादिकाष्ठागनयुगमनुभिस्संयुनं लिंगरूपैः ।
नत्वानंनाख्यशंभुर्वरगुरुकरुणांभोधिसंसिक्तचेता-
श्श्रीमत्सिद्धांनसारावलिविवृतिवरं[2] वच्मि गूढार्थसिद्ध्यै ॥

तत्र तावदामर्दकमठनिवा[सी] सकलागमपारदृश्व[।*] त्रिलोचनशिवाचार्य्यस्स्वस्य नानागमसंभूनकामिकसिद्धांनाचद्भेदं मृगेंद्राद्यागममालोच्य तत्र शब्दार्थयोस्सामर्थ्येन लब्धप्रमाणश्लोकैरनेकैर्निर्णीनार्थपदार्थत्रययुक्तं संपादचतुष्टयं सिद्धांतसारावलीनामधेयं ग्रंथं [3]चिकीर्षतश्चिकीर्षित . . . विघ्नेन परिसमाप्त्यर्थं निष्कळम्मूलमंत्रस्योच्चारण-भेदेन *etc.*

No. 1117.

At the end of one of the *adhyâyas* :— श्रीमदामर्दमठवासिईशानशिवाचार्य्य-विरचितायां क्रियाक्रमद्योतिकायां निर्वाणदीक्षाविधिः.

No. 1118.

Beginning :—

विषां[4] वक्रां श्रुतं किंचित् मणिमंत्रौषधादिकं ।
तत्र कर्मणि ता[न्] पूर्वा[न्] प्रणमामि महात्मनः ॥
संसारे बहुविस्तीर्णे विद्यासिद्धिरनेकधा ।
मोक्षं वा शंकरं पूर्वं यदि पृच्छति पार्वती ॥
अन्यैर्देहगतैस्सिद्धैर्मुनीनैकैकसाधके ।
यद्यद्युक्तं हि शास्त्रेषु तत्तत्सर्वं विलोकितं ॥

---

[1] Read च्योतन्ते. [2] Read °वरां. [3] Read चिकीर्षश्चि°.

[4] Read येषां वक्त्राच्छ्रुतं, as in Professor Weber's No. 1745, with the help of which many other mistakes in the following verses can be corrected.

शांभवे यामळे शाक्ते कुलकौळे च डामरे ।
स्वच्छंदे लाकुले शैवे राजनंत्रेमृनेश्वरे ॥

उड्डीशे वानुले तंत्रे उच्छिष्टे सिद्धिशास्थरे ।
करंकिणीमेरुनंत्रे काकिचंडीश्वरीमने ॥

शाकिनीडाकिनीतंत्रे रौद्रेनुग्रहनिग्रहे ।
कौशिके शल्यनंत्रे च क्रियाक . गणोत्तरे ॥

हरमेखलके ग्रंथे इंद्रजाले रसार्णवे ।
अथर्वणि महावेदे चार्वाके गारुडेपि च ॥

इत्येवमागमोक्तं च वक्त्राद्वक्त्रेण यच्छ्रुतं ।
तत्तत्सर्वं समुद्धृत्य दध्नो घृतमिवादरात् ॥

साधकानां हिनार्थाय मंत्रखंड इहोच्यने ।
वश्यमाकर्षणं स्तंभमोहमुच्चाटमारणं ॥

उद्वेष्यं व्याधिमरणं पशुसस्यार्थनाशनं ।
कौतुकं चेंद्रजालं च यक्षिणं मंत्रसाधनं ॥

चेटकं चांजनं दिव्यमदृश्यं पादुकागतिः ।
घुटिकाखेचरत्वं च मृतसंजीवनादिकं ॥

तथा कक्षपुटे सिद्धां सांगोपांगमनेकधा ।
सुसिद्धं प्रत्ययोपेतं साधकानां हितं प्रियः ॥

ततमंत्रमुखवाद्ज्ञातः कर्तव्यं सिद्धिमिच्छता ।

At the end of the 13th *upadêśa* :— इति श्रीसिद्धनागार्जुनविरचिते कक्षपुटे [1]कौतेहलेंद्रजालकं नाम त्रयोदशोपदेशः.

No. 1119.

At the end of one of the *upadêśas* :— इति श्रीपार्वतीपुत्रश्रीनित्यनाथसिद्ध-विरचिते रसरत्नाकरे मंत्रखंडे सर्वांजनन्नाम मंत्रांजनन्नाम [2]स्तंचदशमोपदेशः.

---

[1] Read कौतूह°. [2] Read पञ्च°.

No. 1121.

Beginning :—

शतमखपूजितपादं शतपथमनसाप्यगोचराकारं ।
सितजलरुहनिभनेत्रं [1] सीनाश्छायांगमाश्रये रामं ॥

तत्र भगवांश्छंकराचार्यः *etc.*

Colophon :— इति परमहंसपरिव्राजकाचार्य्यरचितात्मबोधप्रकरणस्य दीपिका समाप्ता.

No. 1127.

Colophon :— इति कैवल्यसौधनिश्श्रेण्याख्ये विद्यासारसंग्रहे सूत्रभाष्यसारसंग्रहस्समाप्तः.

No. 1135.

Beginning :—

नानाविधास्सरस्वत्यस्संतु किं ता[भिरत्र*] नः ।
ब्रह्मानंदपदां वंदे ब्रह्मानंदसरस्वतीं ॥
ब्रह्मानंदसरस्वत्यास्त्वाज्ञासद्रत्नभूषणं ।
आदाय कुरुते भाष्यगंभीरामृतसागरान् ॥
सुषुवे . . वल्ली यान् देवी समरपुंगवाध्वरिनः ।
पितृचरणानाचार्य्यान् वंदे तान् पूर्णयोगींद्रान् ॥
प्रणवांतरगंभीरगंबीजासनवासिनं ।
महाग[णप]तिं वंदे महाविद्याप्रदायिनं ॥
छांदोग्यभाष्यतात्पर्य्यमनुसृत्य वितन्यते ।
उपासनाप्रयोगोयं वेंकटेश्वरदीक्षितैः ॥
शंकरश्शंकरस्सा[क्षाद्यत]स्तत्तनयोस्म्यहं ।
तदभिप्रायतः कुर्वे श्रौतोपासाविधिं स्फुटं ॥

Colophon :— श्रीमत्परमहंसपरिव्राजकाचार्य्यब्रह्मानंदसरस्वतीपूज्यपादशिष्यस्य पूर्णानंदपूर्वाश्रमात्मजस्य वेंकटेश्वरदीक्षितस्य कृतावुपासनाप्रयोगे तृतीयोध्यायः ।

---

[1] Read सीताछा°.

No. 1138.

Colophon :—

तैत्तिरीयकविद्यायाः प्रकाशेनोपसेवकान् ।
बुभुत्सूननुगृह्णातु विद्यातीर्थमहेश्वरः ॥

इति तैत्तिरीयकविद्याप्रकाशस्समाप्तः ।

No. 1140.

Beginning :—

वाधूलवरदाचार्य्यपादपंकजमाश्रये ।
यदाश्रितानां मुक्तिश्च भुक्तिश्च सुलभा भवेत् ॥

वंदामहे नृसिंहार्य्यं वाधूलान्वयनायकं ।
कांतोपयंत्रयोगींद्रकरुणापात्रतां गतं ॥

पदवाक्यप्रमाणज्ञं वंदे समरपुंगवं ।
कृतार्थाः प्राणिनस्सर्वे यस्यावतरणाद्भुवि ॥

पोळीपाक इति ख्यातो[1] सौंढरायपुरे वसन् ।
आभिजात्येन वृत्तेन विद्यया चातिशायिनः ॥

पुत्रोहं वरदार्य्यस्य भारद्वाजकुलोद्भवः ।
श्रीनृसिंह इति ख्यातो ज्योतिश्शास्त्रार्थपारगः ॥

प्राचीनानि विधानानि सम्यग्वीक्ष्य समंततः ।
संक्षिप्य तेषु सारांशं वक्ष्ये कालप्रकाशिकां ॥

No. 1144.

Beginning :—

एकद्वित्रिचतुःपंचषड्वर्णानुक्रमोज्ज्वलैः ।
कादिवर्गैश्च नानार्थसंग्रहोयं वितन्वते[2] ॥

No. 1147.

Beginning :—

आशौचनिर्णयाख्यामभिनवषडशीतिमात्मना रचितां ।
व्याकुर्वे मन्वादि . . . .

[1] Read ख्याते.   [2] Read वितन्यते.

No. 1151.

Beginning :— * * *

गुरून् प्रणम्य शिरसा गीर्वाणेंद्रमुनीश्वरान् ।
कुर्वे शैवहितायाहं वैदि[काचारनिर्णयं*] ॥

No. 1152.

At the end of the 1st *varṇaka* :— इति धर्मराजाध्वरींद्रविरचितायां पञ्चपादिकाप[ददीपिकायां] . . . . र्णकं समाप्तम्.

No. 1154.

At the end of the 3rd *ullāsa* :— इति पदवाक्यप्रमाणपारावारपारीणकौशिकगोत्रविशेषकचिदंबरकविरचितायां चिदंबरकृतेः चिदंबरविलासस्य व्याख्यायां अर्थप्रदीपिकाख्यायां तृतीय उल्लासः.

No. 1155.

Beginning :—

वंदेहं सुंदरं डिंभं गैरिसुंदरिकेयकः ।
स्तन्यं मे यत्ससा[1] स्वीयं संददौ गिरिसुंदरी ॥

At the end of the 1st *sarga* :—

गोपालविजयसंज्ञे गिरिसुंदरिदासनामकविरचिते ।
(महा)काव्ये प्रथमस्सर्गो निसर्गविशदोभवच्छ्रीमान् ॥

इति गिरिसुंदरिदासविरचिते गोपालविजयमहाकाव्ये प्रथमस्सर्गः.

No. 1164.

Colophon :— इति श्रीशैवपुराणे कोटिरुद्रसंहितायां उत्कृष्टशिवक्षेत्रप्रकरणे वैद्यनाथस्थानमाहात्म्ये अखिलदेवतापूजनं नाम नवमोध्यायः.

No. 1167.

Colophon :— इति श्रीशिवपुराणे जप्येश्वरमाहात्म्ये शिवभक्तकथनं नाम नवमोध्यायः.

---

[1] Read यत्स्वसा.

No. 1170.

Colophon:— इत्यादिमहापुराणे श्रीशैवे एकादशरुद्रसंहितायां पुंडरीकपुरमाहात्म्ये नवमोध्यायः.

No. 1171.

Colophon:— इति श्रीस्कांदे शतसहस्रसंहितायां हिमवत्खंडे शिवरहस्ये तृतीयांशे उत्तरखंडे स्कंदागस्त्यमुनिसंवादो नाम शततमोध्यायः.

No. 1175.

Beginning:—

अह्नेनाब्जविकासकैकतरणिं हार्दांधकाराच्छिदं
शांत्यादेर्निलयं दयैकशरणं वैराग्यवन्मूर्त्तिकं ।
हृत्कांतारमहाटवीमुविलसत्कामेभपंचाननं
श्रीरामेंद्रवनाभिधं गुरुमहो भक्त्या नमामस्तरां ॥

यत्पादांबुरुहध्यानाद्धार्दं मे गळितं मतेः[1] ।
परमं तं गुरुं भक्त्या श्रीदेवेंद्रवनं नुमः ॥

व्यासोक्ते स्कांदसंज्ञेयं[2] पुराणे काशिकाह्वये[3] ।
खंडोयं तस्य टीकेयं रामानंदेन रच्यते ॥

श्रीवासुदेवाभिधभूसुरेंद्रगुणैकरत्नाम[ल*]सत्त्ववार्धेः ।
वाक्यग्रहेणाहमिह प्रवृत्तः क्षंतव्यमस्मच्चपलं कृतींद्रैः ॥

Mukundapriya is mentioned as the author's father, and Chaturbhuja as another of his *gurus*.

Colophon:— इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमद्भगवत्पादपूज्यशिष्यश्रीरामेंद्रवनशिष्येण चैतन्यवनापरपर्यायेण रामानंदेन कृता काशीखंडटीका समाप्ता.

No. 1177.

Colophon:— इति श्रीपरमहंसपरिव्राजकाचार्य्यशुद्धानंदपूज्यपादसेव्यश्रीमदानंदगिरिविरचितपञ्चीकरणविवरणं [समाप्तम्].

---

[1] Read तमः.   [2] Read °संज्ञेस्मिन्.   [3] Read °ह्वयः.

No. 1179.

Beginning :—

नारायणोपनिषदं भेदपर्वतभेदिनीं ।
व्याख्यास्ये ब्रह्मविद्याया जननीं पापहारिणीं ॥
संबंधो विषयस्तद्वन् साधिकारि प्रयोजनं ।
सर्वोपनिषदां तुल्यं तस्मान्नात्रोच्यते पृथक् ॥

No. 1181.

Beginning :—

नत्वा श्रीदक्षिणामूर्तिं ज्ञानेंद्रगुरुरूपिणं ।
विवृणोमि यथान्यायं पञ्चीकरणवार्त्तिकं ॥

No. 1182.

Beginning :—

आनंद आत्मा स्थिरजंगमाना-
मस्त्यत्र चित्रस्तमहं प्रपद्ये ।
कौषीतकिब्राह्मण आत्मविद्यां
[1] यदावलोकात्प्रकटीकरोमि ॥

At the end of the 4th *adhyâya* :— इति श्रीमत्परमहंसपरिव्राजकाचार्यानंदात्मपूज्यपादशिष्यस्य श्रीशंकरानंदभगवतः कृतौ कौषीतकिब्राह्मणोपनिषद्दीपिकायां चतुर्थोऽध्यायस्समाप्तः.

At the end of the 5th *adhyâya* :— इति श्रीकौषीतकीयब्राह्मणोपनिषत्पदयोजनिकायां पंचमोऽध्यायस्समाप्तः.

No. 1185.

Beginning :—

[रु]द्रक्षेत्रज्ञवर्गस्समुदयति यतो यत्र विश्रांतिमृच्छे-
द्यत्र त्वं यस्य विश्वं स्फुरितमयमियद्यन्मयं विश्वमेतत् ।
स्वच्छंदानंदवृंदोद्भवदमृतमयानुत्तरस्संहितत्वं [2]
चैतन्यं शांकरं तज्जयति यदखिलद्वैतभासाद्वयात्मा ॥

---

[1] Read यथाव°.

[2] Read °घलद°.

आसमंजस्यमालोच्य वृत्तीनामिह तत्त्वतः ।
शिवसूत्रं व्याकरोमि गुर्वाम्नायाविगानतः ॥

The introduction further says that Vasugupta learnt the *Śivasûtras* from Mahêśvara and explained them to his pupils, Kaiyaṭa and others.

No. 1186.

Beginning :—

संघट्टघट्टनवलोडिननिर्विकार-[1]
शून्यातिशून्यपदमव्ययबोधसारं ।
सर्वत्र खेचरदशा[2] प्रविराजते य-
त्तन्नौमि साहसवरं गुरुवक्त्रगम्यं ॥
सर्वोल्लंघनवृत्त्येह निर्णिकेतोक्रमक्रमः
कोप्यनुत्तरचिद्व्योमस्वभावो जयतादतः ॥
श्रीमद्वातुलनाथस्य हृदयांभोधिसंभवं ।
पूज्यपूजकपूजाभिः प्रोज्झितं यत्रमामि[3] तत् ॥
येनेह सर्ववृत्तीनां मध्यसंस्थोपि सर्वदा ।
महाव्योमसमाविष्टस्तिष्ठाम्यस्मिन्निराविलः ॥
तमपूर्वमनावेशमस्पर्शमणिकेलनं[4] ।
[5]संविद्धिकल्पसंकल्पघटनं नौम्यनुत्तमं ॥
योगिनीवक्त्रसंभूतसूत्राणां वृत्तिरुत्तमं[6] ।
केनापि क्रियते सम्यक् परतत्त्वोपबृंहिता ॥

Colophon :—

इति परमरहस्यं वाग्विकल्पौघमुक्तं
भवविभवविभागभ्रांतिमुक्तेन सम्यक् ।
कृतमनुपममुच्चैः केनचिच्चिद्धिकासा-
दकलितवरगत्या [7]ताहसोल्लासवृत्त्या ॥

समाप्तोयं श्रीमहा_वा*_तुलनाथीयत्रयोदशीकथारूपसूत्रत्रयोदशावृत्तिः.[8]

---

[1] Read °विलोडित° (?). [2] Read °दृशा (?).
[3] Read यत्रमामि. [4] Read °मनिकेतनम्. [5] Read संविद्ध° (?).
[6] Read °त्तमा. [7] Read साह°. [8] Read °दशीवृत्तिः.

No. 1192.

Colophon :— इति श्रीपदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसुरैः[1] सुनुवा भट्टोजिदीक्षितेन विरचितस्तिथिनिर्णयस्समाप्तः ॥ शके १६१*[2] सिद्धार्थिनामसंवत्सरे वैशाखवद्य-चतुर्दशा रवौ धर्माधिकारिसदाशिवेन लिखितोयं ग्रंथः.

No. 1195.

Beginning :—

निरवधिसंसृतिनीरधिनिपतितजनतारणस्फुरन्नौकां ।
परमनभेदनघुटिकां परमशिवेंद्रा(चा)र्य्यपादुकान्नौमि ॥
देशिकपरमशिवेंद्रादेशिकवचोद्बुद्धदिव्यमहिमानं[3] ।
स्वात्मनि विश्रांतिकृते सरसं प्रस्तौमि किंचिदिदं ॥

No. 1198.

Colophon :— इति श्रीमदादिनाथविरचितायां महालसंहितायां कालिकासंवादे सुंदरीशक्तिदानाख्यं कालीस्वरूपमेधासहस्रनाम संपूर्णमस्तु.

No. 1205.

Colophon : — इति षुलकोटिप्रभेदे सपादलक्षे श्रीपार्वतीशंकरसंवादे विजयाकल्पस्समाप्तः.

No. 1208.

Colophon :— इति श्रीपुरागमे गौरीशिवसंवादे बालाकवचं नाम पंचाशत्पटलः.

No. 1210.

Colophon :— इति श्रीविरूपाक्षविरचितं जगद्रक्षाख्यं कालिकाकवचं संपूर्णम्.

No. 1213.

Colophon :— इति श्रीवामकेश्वरतंत्रे नित्याषोडकार्णवे[4] सौभाग्यकवचं नाम त्रिशत्तमः पटलः.

No. 1215.

At the end of the 2nd *adhyâya* :— स्वस्ति श्री शके १९२४ ॥ ॥ शोभ-कृत्संवत्सरे ॥ ॥ फाल्गुनमासे कृष्णपक्षे पंचम्यां शुभनक्षत्रे समाप्तोयं ग्रन्थः.

---

[1] Read °सूरेः सूनुना. [2] Read १६०१ or १६६१. [3] Read °देशवचोबुद्ध°.
[4] Read °षोडशार्णवे.

No. 1216.

Colophon :— इति श्रीब्रह्मांडपुराणे कावेरीतीरकैलाससमानशिवक्षेत्रप्रशंसायां गोमुक्तीश्वरमाहात्म्ये पुरंदरगाण(।)पत्यकथनन्नाम तृतीयोध्यायः.

No. 1218.

Colophon :— इति श्रीमद्भासुरानंदनाथचरणारविंदमिळिंदायमानमानसेनोमानंदनाथेन निर्मितेभिनवे कल्पसूत्रानुसारिणि नित्योत्सवनिबंधे साधारणक्रमनिरूपणो नाम(।) [1]नवस्योल्लासस्समाप्तिमगमत् संपूर्णश्चायं निबंधः.

No. 1221.

Beginning :—

सर्वभावान्तरस्थाय चेत्यमुक्तचिदात्मने ।
प्रत्यक्चेतनरूपाय मह्यमेव नमो नमः ॥

नत्वा गणेश्वरं . . सांबं सद्गुरुमेव च ।
कैवल्यसौधनिश्रेणी रच्यते विदुषां मुदे ॥

मुमुक्षूणां विरक्तानां सकृत् श्रवणमात्रतः ।
ज्ञानलाभाय चान्येषां सर्वपापनिवृत्तये ॥

तस्मादियं ब्रह्मविद्या सारसंग्रहरूपिणी ।
सेवनीया सदा सद्भिरिति विज्ञापनं मम ॥

श्रीमच्छारीरके भाष्ये सारांशः प्रोद्धृतस्तथा ।
भामत्यां [च*] कल्पतरौ पञ्चपादयुतेपि च ॥

तथा विवरणे तत्त्वदीपने स्वल्प एव हि ।
तथा संक्षेपशारीरनामकेतिमनोहरे ॥

ईशादिदशभाष्येषु श्वेताश्वतरभाष्यके ।
तपनोत्तरभाष्ये च गीताभाष्ये यतिप्रिये ॥

सनत्सुजातीहवि[ष्ण]नामसाहस्रभाष्ययोः ।
बृहदारण्यकस्यापि तैत्तिरीयस्य वार्त्तिके ॥

---

[1] Read नवमोल्लासः.

दक्षिणामूर्तिसुतुतिवार्त्तिके मानसप्रिये ।
पञ्चीकरणकस्यापि वार्त्तिके ज्ञानदायिनि ॥
तथा वार्त्तिकसारे च सर्वसंसारनाशिनि ।
वि . प्रकाशेनुभूतिप्रकाशे विदुषां मते ॥
तात्पर्यदीपिकायां च (द्या)योगे सांख्ये तथैव च ।
विद्यासारस्संगृहीतो विद्वदाह्लादसिद्धये ॥

No. 1226.

Colophon :— श्रीमद्व्याघ्रपुरवासिवामदेवात्मजवेदज्ञानविरचितायां[1] दीक्षादर्शे अंकुरार्पणविधिः.

No. 1228.

Beginning :—

लोकानुग्रहहेतोः करुणारसनिर्भरेण चित्तेन ।
तत्त्वप्रकाश एषो (!) समभिक्रियते समासेन ॥

No. 1229.

Beginning : — * * * * * *

श्रीमतां व्याससूत्राणां श्रीकंठीयः प्रकाश्यते ।
मधुरो भाष्यसंदर्भो महार्थो नातिविस्तरः ॥
व्याससूत्रमिदं नेत्रं विदुषां ब्रह्मदर्शने ।
पूर्वाचार्य्यैः कलुषितं श्रीकंठेन प्रसाद्यते ॥
सर्ववेदांतसारस्य सौरभास्वादमोदिनां ।
आर्य्यानां[2] शिवनिष्ठानां भाष्यमेतन्महानिधिः ॥

Colophon :— इति श्रीकंठशिवाचार्य्यविरचिते ब्रह्ममीमांसाभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः.

No. 1235.

Colophon :— इति श्रीवत्सकुलतिलकवैद्यनाथसुमतिसूनोः वैय्याकरणाचार्य्यसार्वभौमश्रीरामभद्राध्वरिगुरुचरणश्लाघितमतिकौशलस्य गोपालकृष्णशास्त्रिणः कृतौ शा[ब्दि]कचिंतामणौ प्रथमाध्यायस्य प्रथमे पादे चतुर्थमाह्निकम्.

---

[1] Read °रचिते.   [2] Read °णां.

No. 1236.

Colophon :—

यज्ञना[रा*]यणाख्यस्य सूनुना विबुधेंदुना ।
श्रीवेंकटेशविदुषा कृता जानकचंद्रिका ॥

No. 1239.

Colophon :— इति श्रीमत्संततसंतन्यमानकूर्म्मषोडशाररथचित्राकारादि[द्विगु]ण-विराजमानप्रौढापरीतमहा . . श्रीशाहजीशरभजीतुकोजीभोसलचोळमहीमहेंद्रा-मात्यधुरंधरस्य श्रीमदानंदरायविद्वत्सार्वभौमस्याध्वर्युणा पंचपुरुषीपोष्येण बाल्य एव तद्यानिर्वर्त्तितापरिमितमहाग्निविजृंभितवाजपेययाजिनोर्लब्धविद्यावैशद्येन[1] अध्वरमीमांस[ा*]कौतूहलनिर्माणप्रकटितसर्वतंत्रस्वातंत्र्येण बोधायनापस्तंबसत्याषाढभारद्वाजकात्याय-नाश्वलायनद्राह्यायणादिकल्पसूत्रतद्भाष्यपारीणमहादेववाजपेययाजिसुतेन अन्नपूर्णागर्भजा-तेन वासुदेवदीक्षितविदुषा विरचितायां सिद्धांतकौमुदीव्याख्यायां बालमनोरमायां स्त्रीप्रत्य-यनिरूपणम्.

No. 1240.

Beginning :—

आरडीयाह्वकृष्णेन रचिता टिप्पणी परा ।
गदाधरीयगृहिळानानंदयतु नित्यशः ॥
गदाधरमतार्थेषु दोषसामान्यलक्षणे ।
नञ्पंचचुरितार्थानां[2] कृत्स्नानामेव कारिका ॥
वैकुंठमध्यावसतोः कमलारंगनाथयोः ।
देहजः कृतवानेनां कृष्णो नारायणात्मजः[3] ॥
इदं गौडधनं धूर्तैः प्रतोळीषु प्रनोव्यते ।
अथ[4] एकीकृतं सर्वं विना मूल्यं प्रगृह्यतां ॥
अस्माकं स्वर्णशून्यानामिदमेव हिरण्यकं ।

No. 1243.

Beginning :—

विश्वेशं सच्चिदानंदं वंदेहं योखिलं जगत् ।
चरीकर्ति भरीभर्ति संजरीहर्ति लीलया ॥

---

[1] Read °याजितो लब्ध°. [2] Read °च्छुरिता° (?). [3] Read °णात्मजः. [4] Read अत.

केलदीवेंकटेंद्रस्य निदेशाद्विदुषां मुदे ।
ध्वांतोच्छित्तौ पटुतरस्तन्यते तत्त्वकौस्तुभः ॥
फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
शांकरादपि भाष्याब्धेः [तत्त्व]कौस्तुभमुद्धरे ॥

Colophon :— इति श्रीमद्विद्वन्मकुटमाणिक्यलक्ष्मीधरभट्टसूनुभट्टोजिदीक्षितविरचिते तत्त्वकौस्तुभे द्वितीयपरिच्छेदे प्रथमस्याध्यायस्य चतुर्थः पादः.

No. 1246.

Colophon :— इति सन्द्यघटीश्रीसर्वानंदकृतौ टीकासर्वस्वे वारिवर्गः. According to Dr. Burnell, *Tanjore Cat.* p. 46*a*, the correct form of the author's name is Vandyaghaṭîya Sarvânanda.

No. 1254.

Beginning :—

विजेग्यानस्सदा शंभुर्जगच्छत् गिरिनां मुदा ।
संचंचुराणः पशुना तंतांताद्यागतिं मम ॥
मूर्तिर्यस्य हि पाणिनिः पदमहाभाष्ये प्रबंधे तथा
वाक्यानां तदपि स्वयं वितनुते वाक्यस्य दास्यं सदा ।
शिष्या यस्य विरोधिवादमकुटीकुट्टाकबंधाटिका-
स्तस्मै मातुलरामभद्रमखिने भूयो नमो मे भवेत् ॥
प्रणम्य परमं देवं भवानीपतिमव्ययं ।
क्रियते वैद्यनाथेन परिभाषार्थसंग्रहः ॥

Colophon :— इति [1]श्रीरत्नगिरिदीक्षितपुत्रेण वैद्यनाथेन विदुषां विरचितः परिभाषार्थसंग्रहस्संपूर्णः.

No. 1255.

Beginning :—

वागीशप्रभृतिस्तुत्यं प्रणम्याहं गणाधिपं ।
करोमि व्यासशिक्षायां व्याख्यानं वेदतैजसं ॥

---

[1] No. 1058 reads रत्नहरि.

Colophon :—

श्रीशांतरंगिणा व्यासशिक्षाया भाष्यमुत्तमं ।
वेलमीकन्यपूर्जातस्त्सरावधानिना[1] कृतं ॥

इति वेल्मीकन्यासूरावधानिविरचिते व्यासशिक्षाविवरणे उच्चारणप्रकरणं संपूर्णम्.

No. 1258.

Beginning :—

विरोधिनां तिरोभावं योपोहन् भारतीभरः ।
वीरेश्वरं गुरुं शेषवंशोत्तंसं भजामि तं ॥
[2]धारितरिपुवक्षोत्रं[3] सच्चक्रपाणिर्नरहरिर्न्नत्वा ।
विद्वन्मंडलहृद्यं तत्परमतखण्डनं तनुते ॥

Colophon :—

मव्यार्जुनक्षेत्रे अस्मिन् सिद्धार्थे कुळीरके ।
भानौ मनोरमोक्तार्थदूषणं समलीलिखं ॥

No. 1259.

Beginning :—

श्रीविठ्ठलो गणेशानं शिवौ वाग्देवतां गुरून् ।
प्रणम्य चंद्रिकां व्याख्यां[4] विदधाति यथामति ॥

श्रीः । परब्रह्मरूपविषयप्रयोजनं परं मंगळरूपमाह । मूले मायेति । श्रुतिशिखार्थाखंडधीगोचरः श्रुतीनां *etc.*

No. 1262.

Beginning :—

नत्वा स्वीयपितामहं बुधवरं गोवर्द्धनं भक्तितो
नत्वा श्रीरघुनाथतातचरणौ श्रीजानकीं मातरं ।
ध्यात्वा व्यासपदांबुजं हृदि चिरं श्रीकृष्णभट्टाभिधो
मौनी संतनुते सतां सुखकरीं तर्कादिकां चंद्रिकां ॥

---

[1] Read °पुर्जात°. [2] Read दारित°. [3] Read °वक्षोन्त्रं.

[4]. Read चन्द्रिकाव्याख्यां.

Colophon :— इति मौनिकुलतिलकायमानगोवर्द्धनभट्टात्मजरघुनाथसुतमौनिश्री-कृष्णभट्टकृततर्कचंद्रिकायां हलन्तपुंल्लिंगस्समाप्तः.

No. 1266.

Beginning :—

नत्वा मुनित्रयं वाणीं विघ्नेशकम्मारिं[1] ।
हरदत्तं हरिं भूयो जयादित्यं च वामनं ॥
कैयटादीन् गुरून् भक्त्या तत्प्रसादान्मयाधुना ।
सूत्राणां पाणिनीयानां विवृति[ः*] क्रियते मनाक् ॥
अनुपादाय सूत्राणि तत्क्रमेण विलिख्यते ।
तदन्वयोदाहरणमात्रमत्र पु(पु)नः क्वचित् ॥
उदाह[र*]णेन्वयेनोह्य उदाहृत्यान्वयः क्वचित् ।
प्रायेण खलु सर्वत्र लिख्यते त[द*]यं पुनः ॥
प्रक्रियारत्नमिदं येन काशिकाब्धेस्समुद्धृतं ।
तेनैव क्रियते भूयो वृत्तिरेषा लघीयसी ॥

No. 1268.

Beginning :—

. . . . . शिरोरत्नं ब्रह्मरुद्रादिसेवितं ।
प्रणम्य पुंडरीकाक्षं वक्ष्याम्याशौचनिर्णयं ॥

Colophon :—

हारीतो वेंकटेशाख्यश्श्रुतिस्मृतिविचक्षणः ।
व्यक्तं [2]श्लोकशतोनेर्थमकरोदघनिर्णय[म् ॥*]

इति स्पष्टोर्थः ॥ समाप्तश्चाघनिर्णयः ॥

मिथे विद . स्मृतिवाक्यभंगैर्भयानकः किंचिदुदंचदर्थः ।
ग्रंथार्थभावो गहनो मयायं तीर्णोतिकृच्छ्रादघनिर्णयाब्धिः ॥
[3]सरस्वतर . . . रिपौत्र[ः*] श्रीरंगनाथार्यसुतस्सुशीलः ।
यजुर्निधिर्व्याकृत वेंकटेशो विष्णोः प्रसादादघनिर्णय . ॥

---

[1] See the extract from No. 1499. [2] Read °शतेनेत्थम° [3] Read सरस्वतीवल्लभसूरि°

No. 1269.

At the end of the 1st *sarga* :—

पुत्रोहं रघुनाथदीक्षितगुरोश्श्रीकृष्णनामा कविः
काव्यं चंद्रकलाविलासमतुलं सद्भाग्यराज्यावहं ।
आद्यं तत्र कलाविलासमगदं श्रीरामचर्य्यां शुभां
अध्यायं च समाप्यमंगळशतैरानंदमत्यद्भुतं ॥

पंचात्र क्रिया(नि) आवहं अगदं अध्यायं समापि आनंदमिति चंद्रकलाविलासाख्यं काव्यं कुवाहनं[1] कृतवानस्मि *etc.*

इति श्रीकृष्णाचार्य्यकृतौ क्रियागोपनरामायणे प्रथमस्सर्गः.

No. 1270.

Beginning :—

विघ्नराजं प्रणम्यादौ वासुदेवं च कामदं ।
आरण्यशिक्षाव्याख्यानमहं कुर्वे यथामति ॥
गणपतिमभिवंद्यापद्यजातामयघ्नं
स्वरपदमिति वर्णोद्बोधकं शीलनेन ।
क्षितिसुरगणहेतोरेतदारण्यशिक्षा-
मृतमिह नवशिक्षावारिधेरुद्धरामि ॥

No. 1273.

Colophon :—

कौंडिन्यगोत्रसंभूतो नीलकंठाख्यपंडितः ।
कृतिमान् विदधे तस्मै चंद्रचूडाय मंगळं ॥

श्रीमत्पाणेशवंशपयःपारावारराकाचंद्रायमाणपदवाक्यप्रमाणपारावारपारीणश्रीरामभट्टतनूजश्रीनीलकंठभट्टविदुषा रचितः तर्कसंग्रहदीपिकाप्रकाशस्समाप्तः.

No. 1276.

In the middle of the *prastâvanâ* :—

सूत्रधारः ॥ स किमेकादशे वर्षे महांतं कवितामार्गमधिरुह्य सुधामधुरिमधुरीणया गिरा बहुशः प्रभुमुख्यानुपतिष्ठमानः श्रीवेंकटेश्वरजटावल्लभार्य्यात् परमेश्वरावतारभेदस्य

[1] Read आवहं.

श्रीकामेश्वरजटावल्लभगुरोः पुत्रिकायामन्नपूर्णांबिकायामधिगतजन्मा सकलशास्त्रपारीणः शंकरनारायणः कविः कदाचिदपि भवतः श्रवसोः पंथानमध्यटीकत ?

Colophon :— रसिकामृतोयं भाणस्समाप्तः.

No. 1281.

Colophon :— इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य्यश्रीकंठमतनिर्वाहधूर्वहचतुरधिकशतप्रबंधनिर्मित्यलंकर्मीणश्रीमदप्पयदीक्षितसोदर्य्यश्रीमदाच्छादीक्षितपौत्रस्य नारायणदीक्षितेंद्रवरसूनोरतिरात्रियाजिनः[1] कृतिषु चित्रमीमांसादोषधिक्कारे अपह्नुतिप्रकरणं संपूर्णश्चायं प्रबंधः.

No. 1282.

Beginning :—

पूर्वोत्तरतंत्रयुगे रचिता नक्षत्रसम्मिता वादाः ।
अधुना पाणिनितंत्रे विदुषां तोषाय रच्यंते ॥

Colophon :— इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य्यश्रीमहाव्रतयाजिश्रीमदप्पयदीक्षितस्य कृतौ पाणिनिवादनक्ष[त्र*]मालायां असिद्धत्वसमर्थनवादः.

No. 1283.

In the *prastâvanâ* :—

सभ्यस्सारविदग्रणीस्स समयो वासंतिको नायक-
स्सेनानीस्सदसोधिपोवनिपतिश्श्रीमान् शिवेंद्राह्वयः ।
नव्यं भव्यगुणं च रूपकमिदं सोयं स्वतंत्रः कवि-
स्तंत्रेष्वप्यखिलेषु नात्वसरणौ कामं धुरीणा वयं ॥

* * *

यस्य प्रतीकमरविंददळायताक्ष-
स्सानंदमिंदुमकुटश्शिशिरैः कटाक्षैः ।
अंबा च पश्यति गुणैस्सुरभीकृतं त-
द्देवस्य रूपकमिहास्ति षडाननस्य ॥

* * *

[1] Read °रात्रयाजिनः.

यद्वंश्या विमलाश्श्रुतिस्मृतिवचोनुष्ठाननिष्ठाशया-
स्सर्वज्ञा नृपमानिता जगदभिव्यक्तोल्लसत्कीर्तयः ।
कामाक्षीश्वरयोस्सतीमतिमतां कोटीरयोर्नंदन-
स्साहेंद्रोः पुरि वीरराघवसुधीः कौंडिन्यगोत्रोद्भवः ॥

Later on, this *Sâhêndupura* is also called *Mahârâjapurî.*

No. 1284.

Beginning :—

यो वेदशास्त्रार्णवपारदृश्वा यज्ञादिकर्माचरणेतिदक्षः ।
सदाशिवाराधनशुद्धचित्तस्तं बालकृष्णं पितरं नमामि ॥
[1]श्रीकंठदेवं प्रणिपत्य सद्गुरुं मीमांसकध्वांतसरोजभास्करं ।
अत्यंतसंक्षिप्तपदार्थतत्कृतौ प्रभावलीटिप्पणमातनोम्यहं ॥

No. 1287.

Beginning :—

श्रीमद्वात्सकुलप्रसूनमरविनश्श्रीरामभद्रप्रभोः
पुत्रस्यार्य्यवरस्य दीक्षितमणेरय्याख्यविद्वन्मणेः ।
पुत्रस्यास्य महामतेर्बुधमहाहंभावबद्धच्छिदः[2]
पुत्रोश्वत्थबुधस्तु साधु तनुते वादार्थभावान् मुदा ॥

No. 1301.

Beginning :—

यं ध्यात्वा द्विरदं धीरा व्यापारे विघ्ननाशनं ।
दुष्करे[3] विघ्नवर्त्त[न्ते] तं वंदे द्विरदाननं ॥
अनर्घराघवाख्यस्य नाटकस्य यथामति ।
करोमि पंचिकां विष्णुर्मूर्तिनाथार्यनंदनः ॥
मया मंदेन रचिता पंचिकेयं मनीषिभिः ।
उक्तानुक्तदुरुक्तिज्ञैः प्रयत्नेन विशोध्यतां ॥

Colophon :— इत्यनर्घराघवपंचिकायां मुक्तिनाथसूरिसूनुविष्णुविरचितायां सप्तमोंकः.

---

[1] Read श्रीखण्ड°. [2] Read °बन्धच्छिदः. [3] Read दुष्करेपि प्र°.

No. 1307.

Beginning :—

श्रीमच्छेषगिरेस्तटाधिनिलयं श्रीवेंकटेशं गुरुं
नत्वा [वेंकटनाय*]कस्त्वनुदिनं जातोप्पयार्य्यात्सुधीः ।
ज्योतिश्शास्त्रमहाब्धिपारगमने वक्ष्यामि पोतात्मकं
ज्योतिश्शास्त्रविवेकपाकविदुषां सर्वार्थचिंतामणि ॥ [1]

No. 1320.

Colophon :—

ब्रह्मानंदं विमलमचलं पार्वतीशं परेशं
विश्वाधारं विगतजनुषं धूर्वहं तं [धु]रीणं ।
ध्यान [2] ध्येयं विविधमुनिभिः वैद्यनाथं विनाथं
व्याख्या सैषा स्वकृतवचनैः कारितेयं कृतेन ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्य्यगोविंदानंदभगवत्पादपूज्यशिष्यतारकब्रह्मानंदसरस्वतीविरचिता चित्प्रभानाम्नी परिभाषेंदुशेखरव्याख्या समाप्तिमगमत्.

No. 1328.

Beginning :—

मध्वतंत्रमुखमर्दनं मया यत्कृतं प्रकरणं मिताक्षरं ।
पद्यरूपमनतिस्फुटाशयं तत्सुखावगतये विविच्यते ॥

Colophon :— इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य्यश्रीरंगराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतिर्मध्वमुखभंगव्याख्यानं मध्वविध्वंसनं संपूर्णम् ।

No. 1333.

Beginning :—

नत्वा श्रीकृष्णपादाब्जं योगिध्येयमभीष्टदं ।
स्मृत्वा गुरुगिरः कुर्वे भामत्युक्तार्थसंग्रहं ॥

No. 1337.

Beginning :—

पूर्णज्ञानाय निर्भेदपरमानन्दमूर्तये ।
व्यासशंकररूपाय श्रीपरब्रह्मणे नमः ॥

---

[1] The same beginning is given in *Notices*, No. 2870, and *Tanjore Cat.* p. 78*b*, where, however, the second *pâda* of the verse is corrupt. Veṅkaṭanâyaka is the name of the author, and Appayârya that of his father.

[2] Read ध्यात्वा.

नत्वा श्रीभगवत्पादपादयादोरुहद्वयं ।
करोम्यद्वैतसिद्धान्तवैजयन्तीं सतां मुदे ॥

No. 1356.

Beginning:—

वंदे मंदेनरगुणमणिग्रामविश्रामभूमिं
नित्यप्रत्यस्तमितनिखिलावद्यरूपांधकारं ।
रम्यं सत्यगुरुश्रुतिश्रवणध्यानविज्ञानयोगैः[1]
श्रीजं व्यासं रघुयदुपतिं सत्यविश्वस्य हेतुं ॥

छांदोग्यादिषु देवतोत्तमतया ख्यातो जगद्देशिको
वायुर्मध्वगृहार्य्यविश्रुतकुले[2] जातस्स मध्वात्मना ।
गीताभाष्यमुखाः कृतीर्विरचयन् योद्वैतवादादिकान्
प्रत्याख्यत्तममंदबोधभगवत्पादं प्रपद्येधुना ॥

यश्श्रीतत्त्वविनिर्णयाभिधमनुव्याख्याभिधानां कृतिं
तानि त्रीणि च खंडनानि विशदं वाक्यं[3] गुरूक्ताध्वना ।
[4]माधवादिमताटवीं परशुना न्यायोक्तयेनाच्छिनत्
सोयं श्रीजयतीर्थ आदिशतु मे दुर्वादिभंगे मतिं ॥

श्रीन्यायामृततर्कतांडवकृती तात्पर्य्यसच्चंद्रिका
भेदोज्जीवनमूर्जितार्थद्वयं मंदारमंजर्यपि ।
येनैताः कृतयः कुशाग्रमतिना सर्वोपजीव्याः कृताः
तस्मै व्यासयतीश्वराय शिरसा नेत्रेण कुर्वे नतिं ॥

श्रीमद्व्यासयतीशपूज्यशरणैर्न्यायामृतं[5] सं[भृ]तं
तल्लोकेषु तरंगिणीं विरचयन्नद्वैतसिद्धादिकान्[6] ।
अद्वैतप्रतिरोपितान् विपतकृनुन्मूल्ययामास यो
रामाचार्य्यमिमं स्मरामि मनसा व्यासाख्ययाग्रेसरं ॥

---

[1] This line offends against the metre.
[2] Read °मद्दार्य° (?).
[3] Read [illegible].
[4] Read मायावादि°.
[5] Read °षट्पे°
[6] Read °[illegible].

श्रीरामार्यतरंगिणीनिरसनप्रव्यग्रगौडादिम-
ब्रह्मानंदवचोविधूननकृते जग्रंथ यस्संरिभं[1] ॥
सोयं श्रीवनमालिनैष्ठिकमणिर्व्यासान्ववायोद्भव-
श्श्रीकृष्णार्य्यवरानुगो[2] विजयतां षड्दर्शनीवल्लभः ॥

श्रीव्यासव्रतिसार्वभौमरचितन्यायामृतास्वादने
रामाचार्य्यतरंगिणीघनपरीवाहावगाहादिषु ।
प्रौढश्रीवनमालिमिश्ररचितश्रीसौरभाघ्राणने
त्यक्तान्योत्कलिकम्मनो मम पुनर्नित्यं समुत्कंठते ॥

श्रीन्यायामृतदूषणाय रचिता याद्वैतसिद्धिः पुरा
तद्भंगाय तरंगिणी प्रववृते यातामिळां स व्यधात् ।
ब्रह्मानंदयतिर्म्मितंपचमतिस्तद्दूषणायाधुना
कुर्वेहं वनमालिसौरभदिशा श्रीन्यायरत्नाकरं ॥

तत्रादौ तावन्न्यायामृते *etc.*

No. 1358.

Colophon :— इति श्रीरामभद्रभट्टाचार्य्यविरचितायां दिनकरभट्टीयव्याख्यायां तरंगिण्यां प्रत्यक्षपरिच्छेदस्समाप्तः. At the end of the chapter वायुनिरूपण the name of the author appears as Râmarudrabhaṭṭâchârya.

No. 1380.

Beginning :—

वंदे चिदचिदाधारमिंदिरेशं परात्परं ।
[3]यथाराधनकामानां चक्षुषी द्वे श्रुतिस्मृती ॥
संध्यावंदनमंत्राणां वृत्तिमार्गानुसारतः ।
अर्थस्सारतमोस्माभिर्दिङ्मात्रेण विलिख्यते ॥

No. 1381.

Colophon :— इति श्रीमद्वाधूलकुलतिलकश्रीशैलेदेशिकतनयस्य[4] श्रीवेंकटगुरोः कृतिषु तत्त्वार्थदीपिका नाम तर्कसंग्रहटिप्पणी समाप्ता.

---

[1] Read यः सौरभम्. [2] Read °नुजो. [3] Read यदा°.

[4] Read °श्रीशैल°. According to No. 975, the name of the author's father was Srînivâsa. Compare Dr. Burnell's *Tanjore Cat.* p. 122*a*.

No. 1387.

Beginning :—

योवै जात्वत्र[1] न वेद किंचिद्ब्रह्माद्वयानंदनिमग्नचेताः ।
नारायणानंदयतीश्वरं तं गुरुं सदा शंकरपूर्वमीडे ॥

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादविरचित-हरिमीडेस्तोत्रस्य श्रीमदानंदगिरिभगवत्कृतटीका समाप्ता.

No. 1388.

Beginning :—

निखिलनिगमसारा सर्वभूतांतरस्था
भवतु भवभयानां भेदिनी भारती वः ।
* * *
संसारार्कगभस्तितप्ततनुभिस्संसेवितांघ्रिर्जनैः
कृष्णानंदमहीरुहोमृतरसापूर्णैरपूर्वै . . ।
* * *
. त्रां प्रीतिमुपासकेषु जनयन् जीयान्महीमंडले ॥
अशेषोपनिषत्सिद्धवस्तुतत्वानुगामिनी ।
राघवानंदमुनिना शेषार्येह विमृष्यते[2] ॥

परमार्थसारसंज्ञं ग्रंथं चिकीर्षुराचार्य्यस्तस्य *etc.*

No. 1390.

Beginning :—

कामाक्षीपदपयोजे[3] [ज]प्त्या मुक्तावळीममा ।
श्रीरायनरसिंहाख्यपंडितेन चिकीर्ष्यते ॥

No. 1392.

Beginning :—

गणेशं कमलानाथं प्रणिपत्य गुरोः पदं ।
करिष्ये रामगीताया व्याख्यानं बालबुद्धये ॥

Colophon :— इति श्रीमहीधरविवृता रामगीताविवृतिस्संवत् १९४[०] ।

---

[1] Read यो वै न जानाति.   [2] Read विमृश्यते.   [3] Read °पयोजे जप्त्वा.

[1]नर्मोगयद्रूपमिते च वर्षेमावास्यादिने कृष्णदलेवगाहे ।
वि[वे]श पुर्य्या[2] नरसिंहतुष्ट्यै श्रीरामगीताविवृतिं महीधर[ः*] ॥

No. 1397.

Beginning:—

[3]भाग्योभूतै · भूतीननुदिनमननोभावितस्वावबोधान्[4]
स्वस्यांते स्थापयन् यः प्रभुरनु[भ]वनं स्वस्य विश्वस्य कुर्वन् ।
विश्वव्यापिप्रभावान् विचरति सततं स्वक्रियामात्रनिघ्नं
श्रीलो नीलो मणिर्नः स्फुरतु स हृदये ध्वान्तविध्वंसहंसः ॥

श्रीशाराधनसाधनेन बहुधा कृत्वा विनिस्सारिता
दुर्व्याख्याद्यतिवि[चि]रां (?) सुकृतिनां प्राचामियं राजतां ।
विष्णोर्वक्षसि विश्वनाथनिहिता सिद्धान्तमुक्तावळी
तस्यास्तस्य महाप्रभाप्रपदगा त्रैलोचनी लोचनी ॥
आन्वीक्षिकि प्रजहता किल लोकवृत्त-
मत्यन्तसुस्तमनसा[5] मम सेवितासि ।
नत्वार्थयाम्यहमिदं भवतीमिदानी-
मत्रेप्सिते सचिवतां स्वहितां विधेहि ॥

No. 1403.

Beginning:—

चरणौ शरणींकुर्म्मश्श्रीमन्नारायणप्रभोः ।
अपि श्रीविश्वनाथस्य परमानंदरूपिणः ॥
भाषार्थो[6] निरणायि [यः*] श्रुतिपथन्यायांबुधेः पारगै-
र्विज्ञैर्निर्णयदर्पणप्रभृतिषु ब्रह्मापरोक्षान्वितैः ।
तं बुध्वा तनुते गुरुप्रभृतिभिस्तन्मात्रचेतोगति-
र्ब्रह्मानंदसरस्वती श्रुतिशिरस्सूत्रेषु मुक्तावळीं ॥

---

[1] Read नर्भोमषड्रूप° and correct the preceding figure into १६६०. [2] Read विश्वेशपुर्यां.
[3] Read भाग्योद्भूतभूती°. [4] Read °मननोद्भावित°. [5] Read °सुस्थ°. [6] Read भाष्यार्थो.

Colophon :— इति श्रीपरमानंदसरस्वतीपूज्यपादशिष्यश्रीब्रह्मानंदसरस्वतीविरचितायां ब्रह्मसूत्रमुक्तावल्यां द्वितीयस्याध्यायस्य चतुर्थः पादः । समाप्तश्चाध्यायः.

No. 1404.

Beginning :—

भट्टाचार्य्यसार्वभौमरामभद्रेण धीमता ।
तेजसत्वं[1] सुवर्णादेराधिक्यं च निवार्य्यते ॥

No. 1409.

Beginning :—

ब्रह्मविदद्वैतानंदसरस्वत्याख्ययतिमहेशानान् ।
सूरिसमर्चितपादान्नौति गुरून् देवभद्रशर्मासौ ॥

व्युत्पत्तिवादे तद्धितप्रकरणे पौषादिमासविचारे शूलपाणिमते पौषादिमासानां लक्षणद्वयं प्रदर्शितं *etc.*

Colophon:—

पौषादेर्लक्षणमिदं यथामति विवेचितं ।
प्रीणंतां तेन विद्वांसो संतुष्यात्समयेश्वरः ॥
काशीपुरनिवासेन देवभद्रेण यज्वना ।
प्रणीतः पौषवादार्थः प्रीतये विदुषां सतां ॥

No. 1418.

Colophon :— इनि श्रीगोदावरीतीरनिवासिलक्ष्मपादेवसूनुना[2] माधवदेवे[न*] एवकारदी[धि*]तिसारमंजरी विरचिता समाप्ता.

No. 1427.

At the end of one of the *adhyâyas* :— इति श्रीवत्सकुलजलधिकौस्तुभस्य वैदिकसार्वभौमवेदांतदेशिकसंप्रदायप्रवर्तकपरवस्तुवेंकटदेशिकमुकुतपरिपाकवेदांताचार्य्यानुजश्रीमदादिवराहाचार्य्यतनयस्य तच्चरणारविंदचंचरीकस्य तत्प्रसादलब्धब्रह्मविद्यावैशद्यस्य कोनेज्यंबागर्भसंभवस्य निजहृदयकमलविहरमाणश्रीरंगराजप्रेरितस्य वेदांताचार्य्यस्य कृतिषु वेदांतकौस्तुभे शिवपारम्यनिरासाख्यो द्वितीयोधिकारस्संपूर्णः.

---

[1] Read तैजसत्वं.

[2] Read °लक्ष्मणदेव°.

No. 1436.

Beginning :—

श्रीविघ्नेशमहं नत्वा गुरुं सर्वावधानिनं ।
जटामद्य प्रवक्ष्यामि श्रीजटावल्लभैस्समं ॥

शिक्षादिशास्त्रमखिलं प्रसमीक्ष्य सम्य-
ग्वेदार्थलक्षणविदां सुखबोधनाय ।
[1] नेमानभैरवबुधेन मणिर्जटाया-
स्संकाश्यते परशिवस्य कृपाकटाक्षात् ॥

यस्य जीवो मुखे [2] वाणी वेदशास्त्रमयी सदा ।
नृत्तं करोति मत्तातं वेंकटेशं नतोस्म्यहं ॥

यस्येश्वरस्यादिवरस्य [3] पुत्री यास्सहैक्यमद्वैतमतीव सत्यं ।
आनंद इत्यत्र भवज्जनानां तं शंकरं लोकगुरुं नतोस्मि ॥

प्रातिशाख्यादिशास्त्रज्ञः-सर्वशिक्षाविशारदः ।
सूक्ष्मबुद्धिस्समर्थो यस्स जटां वक्तुमर्हति ॥[4]

No. 1438.

Beginning :—

ध्यात्वा सर्वजगन्नाथं सांबं सर्वार्थसाधकं ।
जटासिद्धांत[वि]चितेर्व्याख्यां कुर्वे यथामति ॥

पदद्वयमनुक्रम्य व्युत्क्रम्योत्क्रम्य संधिमत् ।
यथावत्स्वरसंयुक्तं प्रयुज्यत्सा [5] जटा मता ॥

Here follows the commentary on the preceding verse.

Colophon :—

ध्यात्वा सर्वजगन्नाथं सांबं सर्वार्थसाधकं ।
रचिता लक्ष्मणाख्येन जटासिद्धांतचंद्रिका ॥

---

[1] Read वेमान°. [2] Read जिह्वामुखे. [3] Read °स्याद्रिवरस्य पुत्र्या सहै°.
[4] The same verse occurs at the end of No. 1438. [5] Read प्रयुज्यत्सा.

प्रातिशाख्यादिसर्वज्ञस्सर्वशिक्षाविशारदः ।
सूक्ष्मबुद्धिस्समर्थो यस्स जटां वक्तुमर्हति ॥

जटासिद्धांतचंद्रिकाव्याख्यानं समाप्तम्.

No. 1439.

Beginning :—

प्रणम्य शंभोश्चरणाब्जयुग्मं
वाण्या गणेशस्य यथा[1] गुरूणां ।
सतां मुदे तित्तिरिसंहितायाः
करोमि वर्णक्रमदर्पणाख्यं ॥

Colophon :—

तैत्तिरीयस्य वेदस्य वर्णानां क्रमदर्पणं ।
वेमांनभैरवार्य्येण बालोपकृतये कृतं ॥

वर्णक्रमदर्पणं संपूर्णम्.

No. 1441.

Beginning :—

गणेशं वरदं देवं प्रणिपत्य गजाननं ।
द्वित्वादीनां प्रवक्ष्यामि लक्षणं सर्वसम्मतं ॥

Colophon :—

[सूरि]देवबुधेंद्रस्य नंदनेन महात्मना ।
प्रणीतं केशवार्य्येण लक्षणं सर्वसम्मतं ॥

सर्वसम्मतशिक्षा समाप्ता.

No. 1444.

Colophon :—

शके नेत्रांबराद्रींदौ [2]तपनामनि वत्सरे ।
मासि भाद्रपदे कृष्णद्वादश्यां शुक्रवासरे ॥
[3]नेरणावितिसूत्रस्य व्याख्यानं फणिसम्मतं ।
शिवरामेंद्रयतिना कृतं संपूर्णतां श्रितं ॥

[1] Read तथा. [2] Read इय°. [3] Read नेर°.

No. 1445.

Beginning :—

. . . . . प्रणिपत्य देवान्
श्रीसूर्य्यनारायणसुप्रसादात् ।
वक्ष्ये क्रियायास्स्वरलक्षणं त-[1]
द्य[द्धो]मकन्यापुरिसूरिभट्टः ॥

No. 1447.

Beginning :—

विघ्नराजमहं वंदे विघ्नानामनुशासनं ।
वक्ष्यामि हस्तनिर्देशलक्षणं शास्त्रसम्मतं ॥

No. 1448.

Beginning :—

प्रातिशाख्यादिशास्त्राणि मया वीक्ष्य यथामति ।
वेदतत्त्वावबोधार्थमिह कालो निरूप्यते ॥

Colophon :— कालनिर्णयशिक्षा समाप्ता.

No. 1451.

The first verse of this *kâvya* runs :—

गुणदोषौ बुधो गृह्णन्निदुक्ष्वेळाविवेश्वरः ।
शिरसा श्लाघते पूर्वं परं कंठे नियच्छति ॥[2]

No. 1460.

Beginning :—

प्रणताज्ञानसंदोहस्वांतध्वंसनकर्म्मठः[3] ।
नम . . स्वतप्रदं . . ॥
यन्नामग्रहमात्रेण क्षीयंते विघ्नहेतवः ।
तमेकदंतं वंदेहं [4]वदकाभीष्टदायकं ॥
यत्पादपंकजद्वंद्वनिरंतरनिषेवणात् ।
विद्यानिधिशिष्यगणो नमामस्तं सुदर्शनं ॥

---

[1] Read तच्छ्रीवेल्मिकन्या° in accordance with Nos. 601 and 1255.

[2] This verse is quoted in the beginning of the *Kuvalayânanda*.

[3] Read °ध्वान्तध्वंसन°.

[4] Read वन्दका°.

नमामि पितरौ वृद्धानपि[1] कल्याणचेतसं[2] ।
यत्प्रसादेन मूकोपि भवेद्वाचस्पतेस्समः ॥

नमामि जैमिनिमुनिं भाष्यकारप्रभाकरौ ।
नाथं भवन्निबंध्रृंश्च[3] चंद्रादीन्समुपास्महे ॥

पुरा शकापगातीरे तिर्गात्रिकुलभूषणं ।
यज्ञद्रोणात्समुत्पन्नं प्रणतार्त्तिहराभिधं ॥

तस्मात्समभवत्प्राज्ञो देवराजो बहुश्रुतः ।
ततश्श्रीरंगनाथाख्यो विपश्चित्सप्तमोजनि ॥[4]

तत्सूनुना वरदराजबुधाग्र[ि]गे[*][ि]ण व्याख्यायते नयविवेक इति प्रबंधः ।
सत्संप्रदायमहितो नयदीपिकेति ख्याता यदीयकृतिरादरणीयभावा ॥

तत्र त्रिपाद्यां गंभीरं भवदेवसमीरितं ।
अहन्नयविवेकं तद्व्याख्यास्ये दुर्ग्रहं परैः ॥

महांतं [5]यत्तमास्थाय कर्तुं शक्यं विधांतरं ।
तथापि संप्रदायोत्र दुर्लभस्संप्रकाश्यते ॥

Colophon :— इत्यात्रेयस्य सुदर्शनाचार्य्यवर्य्यशिष्यस्य श्रीरंगनाथसूनोः वरदराजस्य कृतौ विवेकदीपिकायां प्रथमस्याध्यायस्य प्रथमः पादः.

No. 1461.

Beginning :—

त्रिपाद्यामनवद्यं यन्मतं व्यक्तं गुरोस्स्वतः ।
विस्तरं सुग्रहं कर्तुं भवस्संक्षिप्य वक्ष्यति ॥

Colophon :— इति भवनाथेन विरचितनयविवेके प्रथमस्य तृतीयः पादः.

No. 1462.

Beginning :—

करुणासारकटाक्षं कल्पितकादंबवासरुचिं ।
कांचन कांचनगौरीं कांतिं कामं नमस्यामः ॥

---

[1] Read वृद्धावपि. [2] Read °चेतसौ. [3] Read ° *banddhṛînścha.*

[4] Dr. Burnell (*Tanjore Cat.* p. 84a) calls Ranganâtha, the son of Dêvarâja, instead of the seventh in descent after him. [5] Read यत्न°.

संप्रदायानुसारेण विद्वद्धृदयरंजनी ।
क्रियते वज्रटंकेन भवानंदप्रकाशिका ॥
विनाधिकरणाक्षेपं वीरवल्लीभुवांकुरः ।
कीर्तिरूर्जस्वला तस्य शास्त्रसंचरणे रसः ॥
रणांकणमनासज्य[1] वीरवल्लीभुवांकुरः ।
स खलु श्लाघते तेन कुर्म्मश्शास्त्ररणे रसं ॥

No. 1463.

Beginning :—

सर्वेशं शंकरं नत्वा जैमिनिं यमिनां वरं ।
भाष्यकृद्भट्टपादौ च क्रियते विधिभूषणं ॥

Colophon :— इति श्रीमदद्वैतब्रह्मविद्याचार्य्यकसर्वधुरीणनिगमप्रतिष्ठापितनिखिल-[2] पौण्यभूपालकुलकुर[वं]भारद्वाजाभिजनांभोधिपारिजातकामदेवादिमदोद्दामवदावदद्विरद-बृंदविरुदसर्वलुंटाकसक . घंटापथायमानवांमुखश्रीरामभट्टाचार्य्यप्रणप्तुः[3] सकलकला-कलापमर्मसर्वस्वसर्वंकषशेमुषीविशेषसुषमोपभूषितश्रीरामचंद्रबुधचंद्र . विधिविद्वज्जनसं-रक्षणबद्धकंकणश्रीमीनाक्षीवल्लभविचक्षणाग्रगण्यपौत्रस्य अनन्यसाधारणसौजन्यशेवधि-श्रीरामचंद्रसुधीबृंदारकतनूभवस्य अग्निष्टोमातिरात्रवाजपेयादिमहाध्वर . . . . लक्षणलक्ष्मणगुरु . . . . . लब्धविद्यस्य श्रीसुंदरे . . . . तौ विधिभू-[षणे*] तृतीयं प्रसाधनं.

No. 1466.

At the end of one of the *adhyâyas* :— इति श्रीहारीतगोत्रतिलककुरवशेरि-कुलप्रदीपश्रौतस्मार्तस्वतंत्रश्रीवेंकटपतियज्वनस्तनूजस्य नाच्चमांबागर्भसंभूतस्य श्रीविज-यराघवशास्त्रिगुरुवरकटाक्षलब्धान्वीक्षिक्यादिकतिपयविद्यस्य श्रीकृष्णानंदसरस्वतीगुरुचर-णचरणारविंदपरिचरणलब्धसकलविद्यावैशद्यस्य सर्वतोमुखयाजिनो भास्करदीक्षितस्य कृतौ सिद्धांतसिद्धांजनव्याख्यायां रत्नतूलिकाख्यायां कर्म्मविचारप्राथम्यनिरासांजनविवरणं समाप्तम्.

---

1 Read रणाङ्गणमनासाद्य.

2 *i.e.* the Mahratta kings of Poona.—Read °कुलगुरुवर°.

3 Read °वाङ्मुख°.

No. 1469.

Colophon :— श्रीवत्सकुलजलधिकौस्तुभश्रीमद्वेदांतविद्याप्रवर्तकश्रीमदश्वत्थनारायणशास्त्रितनूजश्रीमन्मन्वादिसर्वधर्मविद्याप्रवर्तकश्रीरामशंकरशास्त्रितनूजसमस्तवेदवेदांतप्रतिपादनपरतत्त्ववस्तुपरिज्ञातृश्रीमच्छिव(ा)रामशास्त्रिणामंतेवासिना श्रीहरिदासवरिष्ठेन राममुब्रह्मण्यशास्त्रिणा कृतः शैववैष्णववादस्संपूर्णः.

No. 1471.

At the end of one of the *pâdas* :— श्रीमदद्वैतविद्याचार्य्यसर्वतंत्रस्वतंत्रसाग्निचित्यासवाजपेययाजिश्रीवेंकटेश्वरदीक्षितनियोगानुभावसमुन्मिषितमनीषाविशेषस्य प्रतिदिनप्रबंधपरमेश्वरषड्भाषासार्वभौमसाग्निचित्यसर्वक्रतुविश्वजिदतिरात्रयाजिसत्यमंगलरत्नखेटश्रीनिवासदीक्षिततनयस्य श्रीकेशवदीक्षितश्रीशेषाद्रिदीक्षितयोः द्वैमात्रेयस्य कामाक्षीगर्भसंभवस्य श्रीमदर्धनारी[श्वर*]गुरुचरणसहजतालब्धविद्यावैशद्यस्य विश्वजिद्याजिनः श्रीराजचूडामणिदीक्षितस्य कृतिषु तंत्रशिखामणौ दशमस्याध्यायस्य तृतीयः पादः.

No. 1472.

Beginning :—

मनुमुख्यसरस्समुद्गतै[:*][1] सुकुमारैः प्रसवैर्वचोमयैः ।
त्रिदिवाप्तिफलैस्स्तवोचितां[2] रचयामि व्यवहारमालिकां ॥

No. 1478.

Beginning :—

. . . संदेहविहीनं च ये जगदीशं ।
सा मयि सेवकभावं प्राप्ते वाग्देवता दधतां ॥
विरोधिनां तिरोधानक्षमो यस्य शिरां[3] गणः ।
विश्वेश्वरगुरुं शषवंशोत्तंसमहं भजे ॥

Colophon :— इति शेषचक्रपाणिपंडितविरचितं कारकलक्ष्यं समाप्तम्.

No. 1481.

Beginning :—

श्रीपाण्डचेशं शिवां स्कंदं गणेशं च सरस्वतीं ।
श्रीदक्षिणामूर्त्तिगुरून् ध्यायामि हृदये सदा ॥

---

[1] Read °समुद्गतैः.   [2] Read °फलैः भजे°.   [3] Read गिरां.

श्रीचिद्घनानंदगुरुं शिवानंदं च सर्वदा ।
पूर्णानंदमहं वंदे पुरुषोत्तमयोगिनं ॥

इदानीं तावत् जगतः ब्रह्मकार्य्यत्वेन तन्मात्रत्वं वक्तुं *etc.*

Colophon :— इति जगदुत्पत्तिप्रकरणं समाप्तम्.

No. 1483.

Beginning :—

श्रुतिस्मृतिपुराणानामालयं करुणालयं ।

* * *

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्यगोविंदभगवत्पूज्यपादाचार्य्यशिष्यशंकरभगवत्पादाचार्य्यविरचितात्मबोधप्रकरणस्य दीपिका समाप्ता.

No. 1484.

Beginning :—

कैवल्यानंदयोगींद्रशुद्धानंदयतीश्वरौ ।
नत्वारभे लघुव्याख्यां दक्षिणाशामुखस्तुतेः ॥

No. 1485.

Beginning :—

श्रुतिस्मृत्यादितात्पर्य्यनिगूढा न्यासविंशतिः ।
स्वयं व्याक्रियतेस्माभिर्दिङ्मात्रेण सदिच्छया ॥

Colophon :—

श्रीमन्नारायणमुनिस्स्वसंप्रदायानुसारतः ।
टीकां पद्वीं महत्प्रीत्यै चकार न्यासविंशतेः ॥

न्यासव्याख्या संपूर्णा.

No. 1486.

Colophon :—इति श्रीवत्सकुलतिलक . . . . कृतौ [1]तन्महागुरूकश्रीमदनंतवेंकटेश्वराग्रजश्रीमदनंतनारायणशास्त्रिपरिपूरिते शाब्दिकचिंतामणौ प्रथमस्याध्यायस्य चतुर्थे पादे तृतीयमाह्निकम्.

---

[1] Read °गुरूक्त°.

No. 1489.

Beginning :—

तेज स्त्रीपुंमभावव्यतिकरसुभगंभावुकं भावयित्वा
कामाक्षीं मातरं तामपि पितृचरणं[1] श्रीनिवासाध्वरीद्रान् ।
सोदर्य्यादर्धनारीश्वरमखिवरतोधीत्य सर्वं च शास्त्रं
संकर्षन्यायमुक्तां[2] प्रथयति कतिचिद्राजचूडामणीष्टी ॥

Colophon :— इति संकर्षन्यायमुक्तावल्यां प्रथमस्याध्यायस्य चतुर्थः पादः.

No. 1495.

Beginning :—

. . . . . करं गौरीं शंकरं श्रीपतिं गुरून् ।
प्रणम्य क्रियते सम्यक् द[शा]देः काल[निर्ण]यः ॥
तत्र . . . . . सूत्रो न्यायमार्गानुसारतः ।
सर्वश्रुती . . . . ॥

Colophon :— इति श्रीमदद्वैतवि . . . . चंद्रसूरितनूभवेन श्रीमल्लक्ष्मणवाजपेयाध्वरिचरणाराधनलब्धविद्येन श्रीमत्सुंदरेशपादारविंद . . . . दिकालनिर्णयस्संपूर्णः.

No. 1498.

Colophon :— इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीमत्कैवल्येंद्रसरस्वतीपूज्यपादशिष्यश्रीमद्ज्ञानेंद्रसरस्वतीपूज्यपादशिष्यश्रीमदभिनवनारायणेंद्रसरस्वतीविरचितायां छांदोग्यभाष्यटीकायां षष्ठोध्यायः.

No. 1499.

Beginning :—

सुरासुरशिरोरत्नब्रह्मरुद्रादिसेवितं ।
प्रणम्य पुंडरीकाक्षं वक्ष्याम्याशौचनिर्णयं ।

प्रारीप्सितग्रंथपरिसमाप्तिपरिपंथिप्रत्यूहापोहाय विशिष्टेष्टदेवतानमस्कारलक्षणं शिष्यशिक्षार्थं ग्रंथतो निबध्नन् चिकीर्षितं प्रतिजानीते सासुर[3] इति . . . . . . नमस्कृत्य आशौचशतकं नाम ग्रंथस्य हारीतवेंकटेशेन कृतस्य व्याख्यां रामानुजदीक्षितः अहं वक्ष्ये.

---

[1] Read °चरणान्. [2] Read °मुक्ता. [3] Read सुरासुर°.

Colophon :—

एकत्र सुखबोधार्थं सुसमीक्ष्य बहुस्मृतीः ।
कृतोघनिर्णयस्स्पष्टं गृह्यतां तद्बुभुत्सुभिः ॥

No. 1500.

Beginning :—

कलानिधिः कौशिकवंशवार्धेः श्रीवी[ठि]नाथो[1] विबुधो मथित्वा ।
धीमंद्रेण स्मृतिदुग्धसिंधुं ददाति सिद्धांतसुधां बुधेभ्यः ॥

Colophon :— अघपंचषष्टी समाप्ता.

No. 1502.

Beginning :—

बहुस्मृतीस्समालोक्य सकलानपि संग्रहान् ।
क्रियते सुखबोधार्थं वाक्यैरघविवेचनं ॥

Colophon :—

विना शास्त्रप्रमाणानि न कोप्यर्थोपि निश्चितः ।
निर्विशंकमयं ग्रंथस्तत्संग्राह्यो बुभुत्सुभिः ।

इति पदवाक्यप्रमाणपारावारपारीणभरद्वाजकुलतिलकश्रीमदनंतसोमयाजिनस्तनूजेन रामचंद्राध्वरिणा विरचिते अघविवेचने द्वितीयपरिच्छेदः ॥ अघविवेचनं समाप्तम्.

No. 1503.

Beginning :—

प्रणम्य पुंडरीकाक्षं देवेशं गरुडध्वजं ।
सर्वस्मृतीस्समालोच्य वक्ष्याम्याशौचनिर्णयं ॥

आशौचदशकशतकयोः यन्मूलभूतानर्थान् यथाज्ञानं संक्षिप्य वक्ष्यामः.

Colophon :—

वात्स्येन वरदार्य्येण श्रीनिवासार्य्यसूनुना ।
कर्णावतंसस्तु सतां कृतस्त्वाशौचनिर्णयः ॥

इत्याशौचनिर्णयस्समाप्तः.

---

[1] Read श्रीवीथिनाथो (?).

No. 1504.

Beginning :—

सर्वास्स्मृतीस्समालोच्य संग्रहांश्च तथेतरान् ।
विवेकः क्रियतेघानां नीलकंठार्य्ययज्वना ॥

Colophon :— इति श्रीमदद्वैतविद्याचार्य्याप्पयदीक्षितस्य भारद्वाजकुलजलधिकौस्तुभस्य श्रीदक्षिणामूर्तेरवतारस्य वरसूनोर्नीलकंठदीक्षितस्य कृतावघविवेके अवशिष्टप्रक्रिया नाम षष्ठप्रकरणं समाप्तम्.

No. 1505.

Colophon :—

पीतं येन समुद्रवारि सकलं गोत्रे नदीयेभवत्
सक्तो ब्रह्मणि विश्वनाथ इति यस्तत्सूनुना धीमता ।
आशौचाखिलसूतकप्रकरणश्लोका मयाष्टाधिका-
श्चत्वारिंशदमी कृताः कविमहादेवेन संक्षेपतः ॥

No. 1506.

Beginning :—

मन्वादिस्मृतिनिचयं निपुणं ज्ञात्वा गुरोर्मुखांभोजात् ।
आशौचतत्त्वविवृतिं त्र्यंबकतनुजः शिवः कुरुते ॥

प्रारीप्सितग्रंथप्रतिबंधांतरायनिच . . . .
ग्रंथाद्बहिरेव कृत्वा ग्रंथकृन्महादेवपंडितस्स्वस्यौद्धत्यं परिहरन् *etc.*

Colophon :— इति श्रीमत्त्र्यंबकभट्टसुतेन महाजनोपनाम्ना शिवसूरिणा विरचितमाशौचतत्त्वविवरणं समाप्तं.

No. 1507.

About the middle of the book :—

श्रीपांडुरंगो हृदये सच्चिद्रूपः प्रकाशतां ।
येन मे संप्रसीदेत ब्रह्मानंदसरस्वती ॥

No. 1510.

At the end of one of the *adhyāyas* :— इति श्रीमद्भारद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्य्यश्रीविश्वजिद्याजिश्रीरंगराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ चतुर्मतसारे नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे चतुर्थस्याध्यायस्य द्वितीयः पादः

No. 1512.

Beginning :—

नत्वा विश्वोदयस्थेमलयहेतुं पतिं श्रियः ।
कुर्म्मः प्रपंचमिथ्यात्वमानखंडनपंचिकां ॥

Colophon :— इति श्रीआनंदतीर्थभगवत्पादाचार्य्यविरचितप्रपंचमिथ्यात्वानुमान-खंडनविवरणं जयतीर्थभिक्षुविरचितं परिपूर्णम्.

No. 1527.

Colophon :— इत्येकशकटगोत्रजवासुदेवात्मजसिंधुस्वाम्यपरपर्य्यायदुर्गयविरचितायां दायसंग्रहश्लोकदशकव्याख्यायां शुद्धो दशमः परिच्छेदः ।

No. 1528.

Beginning :—

वंदे धुंडिं महालिंगं विश्वेशं मणिकर्णिकां ।
ईश्वरश्रीनिवासार्य्याहोबळाख्यगुरूत्तमान् ॥
श्रीमत्कवेरजातीरं विद्वद्वृंदोपशोभितं ।
अत्युत्तमशिवक्षेत्रविष्ण्वादिस्थानमस्ति हि ॥
तत्र तंजपुरं नाम राजस्थानमनुत्तमं ।
राजानः प्रथितास्तत्र भोसलीयान्ववायजाः ॥
तदमात्यकुलोत्पन्न[:*] श्रीमान्वांजेश्वरस्सुधीः ।
माहिषं शतकं चक्रे लोकख्यातमनुत्तमं ॥
तस्य नप्ता माधवार्य्यपौत्रश्श्रीनरसिंहतः ।
लब्धजन्माधीतशास्त्रो वेदवेदांगपारगः ॥
शिष्टा[1] होशानिकर्णाटजातीयो राजपूजितः ।
श्रीमान् वांजेश्वरश्चक्रे विवृतिं शतकस्य च ॥
हिरण्यकेशिसूत्रस्य कृत्स्नस्य विवृतिं तथा ।
काकताळीयवादार्थं तथा विद्वन्मनोहरं ॥

---

[1] Read शिष्टो.

निर्णयो मलमासस्य कृतो येनातिदुर्घटः ।
मिताक्षरादिप्राचीनग्रंथानालोच्य सर्वशः ॥
दत्तचिंतामणिं कुर्वे दत्तशास्त्रशिखामणिं ।

No. 1531.

Beginning:—

नत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
अदिशत्सायणाचार्य्यं वेदार्थस्य प्रकाशने ॥

ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुस्सायणाचार्य्यो वेदार्थं वक्तुमुद्यतः ॥

व्याख्यानादृग्यजुर्वेदौ सामवेदेपि संहिता ।
व्याख्याता ब्राह्मणस्याथ व्याख्यानं संप्रवर्तते ॥

अष्टौ हि ब्राह्मणग्रंथाः प्रौढं ब्राह्मणमादिकं ।
षड्विंशाख्यं द्वितीयं स्यात् ततस्सामविधिर्भवेत् ॥

आर्षेयदेवनाध्यायो[1] भवेदुपनिषत्ततः ।
संहितोपनिषद्वंशो ग्रंथा अष्टावितीरिताः ॥

तत्र महाब्राह्मणषड्विंशाख्ययोः ग्रंथयोर्य्यज्ञाधिकारिणां स्वर्गादिफलप्राप्तये *etc.*

Colophon :— तृतीये नवमः खंडः ।

वेदार्थस्य प्रकाशेन तमो हार्दं निरासयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

सामविधानप्रकाशस्समाप्तः.

No. 1532.

Beginning :—

श्रीमान् वेंकटनाथार्य्यः कवितार्किककेसरी ।
वेदांताचार्य्यवर्य्यो मे सन्निधत्तां सदा हृदि ॥

---

[1] Read °देवताध्यायौ.

विश्वं बिभ्रति वीर्य्यखंडितमहं [1]रानापराधघ्ननां
वात्सल्यैकवशंवदेन कुहनानिद्रां दधद्धर्म्मणा ।
धाम्ना सह्यसुतांतराळपुलिनं [2] रंगेशयं काशयं
लक्ष्मीभूमिनिषेव्यमाणचरणं तत्त्वं परं मन्महे ॥
पद्मावीरुदुपाश्रय स्तबकितस्रग्भूषणास्त्रांबरो [3]
भास्वत्पांड्यधरांघ्रिपल्लवधरो दोस्कंधविभ्राजितः ।
भक्तानां फलितोत्थितैर्मरतकश्यामत्विषा [4] पत्रळो
भद्रायास्तु मुकुंदकल्पविटपी·शेषाद्रिसंगी स नः ॥
तापघ्नापनटित्पते [5] क[म*]लया नित्यानपायर्धये
भक्तानामभिलाषपूरमखिलं [6] संवर्धुकायार्थिनान् [7] ।
वेनंडाचलशृंगसंगिवपुषे भव्याय कृष्णात्मने
जीमूताय चतुर्मुखाध्वरफलीभूताय तस्मै नमः ॥
चरणयुगळमेव यस्य लब्ध्वा
धनमनपायि सुनिर्वृता महांतः ।
तृणमिव विजहुः पुरान्यदर्था- [8]
[9]रवतु स मां घटिकाधराधरेंद्रः ॥
सीदंतीनां श्रुतिपरिषदां साधुतत्वावबोधे
पीडा [10] लुंपन् [11] क्रमतिकलितां [भा*]ष्यपयूिषवर्षैः ।
विश्वत्राणे [12]हरिमहिमुखं सत्यकामं वितन्वन्
पायादस्मानतिपरिबृढश्रेयसामेकसूतिः ॥
तुरगवदनतेजोबृंहिताश्चर्य्यशक्तिः
कविकथकमृगेंद्रस्सर्वतंत्रस्वतंत्रः ।
जयति गुरुरपायां [13] वेदचूडार्य्यसंज्ञा-
मनितरजनलभ्यां लंभितो रंगभर्ता [14] ॥

[1] Read नाना°. [2] Read °पुलिने. [3] Read °तस्त्रग्भूष°.
[4] Read °तोर्थितै°. [5] Read °घ्नाय तडित्वते. [6] Read °माधिकं.
[7] Read °यार्थितात्. [8] See Pâṇini, vi. 3, 100. [9] Read °नवतु.
[10] Read पीडां. [11] Read कुमति°. [12] Read हरिरहि°.
[13] Read °रपूर्वां. [14] Read °भर्त्रा.

अव्याजसौहृदमशेषजनेषु साक्षा-
न्नारायणो नरवपुर्गुरुरित्युषीणां ।
वाचं समत्वाधिकमच्युतमेव जातं
श्रीश्रीनिवासगुरुवेषमहं भजामि ॥

वेदांतार्य्योक्तिभावं भवगुरितवरं[1] कृत्स्नसो नेश्वरोहं
वक्तुं सोढुं च भेको न हि जलधिगतोप्यस्य पारं क्रमेन ।
आज्ञां तद्व्याक्रियायां तदपि शिरसि मे बिभ्रतोप्यासमेधां
सूक्ष्मार्थेष्वादधा[न*]:[2] सममुपकरणैः श्रीनिवासार्य्यचेतः ॥

क्व वेदांताचार्य्यः क्व च पुनरहं क्वास्य धिषणा
परिच्छेदातीता क्व मम मतिरेषाल्प . . . . ।
क्व गंभीरा तद्गी[:*] क्व मम पृथुकानामिव वच(द):
प(।)रं तद्भक्तिर्मां त्वरयति गिरां तस्य विवृतौ ॥

Colophon :— इति शतदूषणीव्याख्यायां चंडमारुताख्यायां संमात्रग्राहिप्रत्यक्ष-भंगो नाम द्वादशस्कंधः.

No. 1533.

Beginning :—

कंसध्वंसिपदांभोजसंसक्तो हंसपुंगवः ।
ब्रह्मण्यगुरुराजाख्यो वर्ततां मम मानसे ॥

पदवाक्यप्रमाणाब्धिविक्रीडनविचक्षणान् ।
लक्ष्मीनारायणमुनीन् [वंदे विद्यागुरू*]न्मम ॥

No. 1541.

Beginning :—

कृतनिगमविभागं केशवांशं मुनींद्रं
यतिगुरुमरुदंशं दैशिकाचार्य्यवर्य्यं ।
कुमतवनकृशानुश्रीनयं व्यासतीर्थं
प्रणमति वनमाली तत्प्रसादैककामः ॥

---

[1] Read °हरं कृत्स्नशो.

[2] Read °धान.

श्रीमध्वशास्त्रदुग्धाब्धेर्येन्न्यायामृतमुत्थितं ।
श्राव्यते तस्य सौगंध्यं स्वश्रुतस्य बुभुत्सया ॥

No. 1542.

Beginning:—

श्रीरामपादाब्जनिमग्नमानसश्श्रीराममुख्याख्यसुधीस्सतां मुदे ।
श्रीमूत्रमुक्तावळिग्रंथटीकां करोमि तत्वार्थविबोधनाख्यां ॥

No. 1543.

Beginning:—

उर्व्यां सकर्णतां याति यद्गुणाकर्णने रतः ।
अर्णवं गुणरत्नानां पूर्णबोधं तमाश्रये ॥
मध्वशास्त्रमहाचापमनुध्याय्यमपीतरैः[1] ।
उद्धृत्य कीर्तिं यो लेभे तं जयार्यं सदा भजे ॥
रमावरास्यांबुजराजहंसो लसत्कथाश्रोत्रकलापदो यः ।
कुवादिराशिकुंजरशीर्षभे . . रिं[2] भजे व्यासमुनिं मुनीशं ॥
मूकोपि वावदूकाख्यो ज[ा*]यते यदनुग्रहात् ।
श्रीसुरेंद्रगुरोस्तस्य पादौ नत्वा गुरुं भवे[3] ॥
सर्वतंत्रस्वतंत्रेण विजयींद्राख्यभिक्षुणा ।
तन्यते चक्रमीमांसा वैष्णवोल्लासकारणं ॥

No. 1544.

Beginning:—

शर्वादिसर्वगीर्वाण[शर*]णा[ग*]तिहेतवः ।
पूर्णप्रज्ञपदांभोजपांसवः पांतु नस्सदा ॥
विधूत . न्मुक्तध्वांतो विशदीकृतपद्धतिः ।
यस्सज्जनानुज्जहार जयतीर्थरविं भजे ॥
पदवाक्यप्रमाण[ज्ञान्*] संप्रदायार्थकोविदान् ।
व्यासतीर्थमुनीन् सेवे दुर्वादिफणिपक्षिपान् ॥

---

[1] Read °नुद्धार्यं°.
[2] Read राट्कुञ्जरशीर्षभिच्चं हरिं.
[3] Read भजे.

अस्मद्देशिकपादानां प्रणम्य चरणांबुजं ।
तात्पर्य्यचंद्रिकाव्याख्यां [विवृणो]मि यथामति ॥

तत्त्वप्रकाशिकाव्याख्याव्याजेन धीसूत्रं प्रवर्तमानेषु ग्रंथेषु दुर्गमनार्थान् सुगमान् विधित्सुः व्यासतीर्थमुनिः प्रारीप्सितग्रंथ *etc.*

No. 1546.

Beginning :—

शंकराय्यंकृते भाष्ये यत्तात्पर्य्यमवस्थितं ।
तच्चाहं संग्रहीष्यामि शैवदुर्मोहशांतये ॥

Colophon: — श्रीमदश्वत्थनारायणशास्त्रिवंशसंभूतैः श्रीमच्छंकरभगवत्पाददासानुदासैः श्रीमच्छंकरभगवत्पादसिद्धांतप्रतिष्ठापकाचार्य्यैः श्रीरामसुब्रह्मण्यशास्त्रिभिः विरचितः श्रीमच्छंकरभगवद्भाष्यतात्पर्य्यसंग्रहस्समाप्तः.

No. 1547.

Beginning :—

लक्ष्मीपतिं संप्रणम्य सर्वज्ञादिगुरूनपि ।
पदार्थानां संग्रहोयं क्रियते शास्त्रतोंजसा ॥

Colophon :—

रघुनाथार्य्यशिष्येण पद्मनाभेन धीमता ।
कृतः[1] पदार्थसंक्षेपो[2] अनुगृह्णंतु सूरयः ॥

इति श्रीपद्मनाभसूरिविरचितः पदार्थसंग्रहस्समाप्तः.

No. 1549.

Colophon :— इति श्रीवत्सकुलतिलकश्रीनिवासार्य्यसूनोः श्रीरंगनाथस्य कृतिषु विवादार्थसंग्रहणं सपूर्णम्.

---

[1] Read कृतं.

[2] Read °क्षेपमनु°.

INDEX OF WORKS AND AUTHORS

[1] The figures refer to the Numbers of the List of Manuscripts. Names of Authors are printed in *italics*.

ERRATA IN THE FIRST REPORT.

Page vii. last line, *for* Vaidiasârvabhakuma, *read* Vaidikasârvabhauma.

,, 95, second column, line 6 from below, *for* 2353*b*, 54, *read* 2353*b*, 534.
